CC-0. Digitized by eGangotri and MIDF- Delhi

६५

माघमाहात्म्य

मात्स्य

माघमाहात्म्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा·म·
॥१॥

श्रीगणेशाय नमः ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
व्यास उवाच ॥ शृणु सूत प्रवक्ष्यामि माघस्नानस्य यत्फलं । तदुक्तं च वसिष्ठेन दिलीपपुरतो यथा ॥ सू-
त उवाच ॥ माघमासस्य माहात्म्यं भगवन् ब्रूहि तत्वतः । योगेस्मिन्वशिष्ठोस्मि ब्रूहि तन्मे यथा तथा ॥
व्यास उवाच ॥ अध्वरावभृतस्नानैः क्षोणिभिः कृतमंगलः । पूजितो नागरैः सर्वैः स्वपुरान्निर्गतो बहिः
दिलीपो भूभुजां श्रेष्ठो मृगयारसिको भृशं । कोलाहलसमाविष्टश्चाखेटव्यूहसंवृतः ॥ उपानगरकंप
र्यन्तनीलो ह्रीहरितद्रुद्वीलीलगोधांगुलित्राणो धनुःपाणीश्वरी नृपः ॥ वद्धखड्गासिधेनुश्चतभाः
भृतैश्च यन्त्रिभिः गांधारैश्चस्वरम्यैश्च वनेषु विपुलेषु च ॥ उद्दत्तं घितमहाश्चोनायुवायंस्वविक्रमः ।
मुदा क्रीडति तैः सार्द्धं कुंजेषु मृगयन्मृगान् ॥ हन्यतां हन्यतामेष मृगो वेगात्पलायते । इति जल्पंः
स्वभृत्येषु स्वयं तत्र त्वं हन्ति वा ॥ इतस्ततः पुनर्यान् तिष्ठ चित्रमपन्यन्नस्थलीनां ॥ विटपोड्डीनसंत्रस्ता ॥१॥
लीलोकेकीकुलाकुलां ॥ हरिणीगणविन्नस्तां धावत्कुपदद्दिश्चरवां ॥ क्वचित्स्फोरवपेत्कोरतारराव ॥मा·मः॥
उच्चैः

CC-0. Digitized by eGangotri and MIDF- Delhi मृगविशेषः

उलूकी

विपी बर्हाणां खड्गयूथैः क्वचित्त्वक्षीमत्तानामिव दंतिनां क्वचित्कोटरसंलीनघूकानादनिनादिनी
मृगारिपदमुद्राभिमुद्रितां च क्वचित्क्वचित्ताशार्दूलनखनिर्भिन्नरोहितकाहतां क्वचित् क्वचिद्
क्षघनच्छन्नां वन्यपुष्पसुगंधिनीं क्वचित्त्रतागहनकारां भंगशाखाप्रणामनां ॥ प्रवृद्धनिस्पृतनिर्मो
कमागर्भीमद्रहद्विलां विलेशयलीनाजगरैर्भीमां निर्मोकसर्पिणीं ॥ क्वचिद्दावानलज्वालाशिले
ज्योतिष्प्रभामनां फेत्कारशब्दसंपूर्णां वृकव्याघ्रभयाकुलां ॥ प्रविष्टं चक्षुनां यूथं शशकेषु चवा
क्वचित्तापल्वलेषु च विश्राम्यन्न योनिवनांतरं ॥ एवं व्रजति राजेन्द्रे व्याध्रवर्गे च वल्गति प्रविः
ष्टं चक्षुनां यूथं शशकेषु क्वचित्क्वचित् ॥ कर्दन्कोलाहलं तत्र सारंगो निर्गतो वनात् ॥ फालवेगः
क्रमाक्रांतदुर्गमार्गमहीतलः ॥ कदाचिद्गगनारूढः कदाचिद्भूमिगोचरः ॥ नवाणलक्ष्यतां याः
तिधान्विनां पृष्ठगामिनां ॥ क्वचिद्दृष्टिपथं याति दर्शनागोचरः क्वचित् ॥ वक्रभ्रांतोतिगंभीरं कंटकि
द्रुमसंकुलं ॥ प्रविवेश विषमारण्यं राजासौ नत्यजन्मृगः ॥ दूराद्दूरं ततो गत्वा देशाद्देशं वनिर्जलं ॥ मृग

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·म·
॥२॥

दर्शनसंरंभः संशुष्कगलकंदरः। नाम्रेनाभ्रमरवः खिन्नः श्रांतपान्थः स्वेदलांछनिः॥ अश्रतीन्द्रदीर्घमा
र्गीसरस्तत्र तीर्थमध्यगोरवौ ददर्श ग्रैतकासारं स्फूर्द्वयंतमयांपतिं॥ घनपादपरम्यं तत्तीर्थे विभ्रमः
लंभ्रमं। विशालविकचांभोजमभ्रमत्तमधुव्रतं॥ पद्मिनीपत्रपालाशांदूनेमरकतैरिवास्तृदंद
प्रोद्दलंदंस्वंस्वदंसाधुमनोयथा॥ वसज्जलवरोन्मिषं वीचिरराजिविराजितं। अंतग्राहगणैः क्रू
रं खलानामिवमानसं॥ कचिद्वैवालदुर्गम्यं कृपणस्येवमंदिरं। नानाविहगसर्वोन्नेसमयंत
दिवानिशं॥ जनतारमिवसर्वस्वरोपन्नार्त्तिमनोहरं। तत्पर्यंतनिजांभोभिः स्वापदान्स्वपितृन्निः
वाहरं तेसर्वसंतापंहिमांशुरिव सादरं। तं दृष्ट्वा भूकृतस्नानिष्पातकोजलदं यथा॥ तत्रपीतज
लोराजाकृतमाध्याह्निकक्रियः॥ भक्त्याखेटकसंपन्नैः सहायैः सहितो नृपः॥ उवाससमसरस्तीरे रम्य ॥२॥
म्यांकथयेत्कथां। ततः शरासनेवाणां कृत्वा रात्रौ स्थितस्तदा॥ व्याधाः संधानमात्पायसस्तुभुःके ॥रामः॥
क्रमांपथां। एवं स्थिते भवीरे भववने विलासार्थवायतां॥ निशार्द्धे निर्गतं यूथं मृकराणां तटेतटे। वः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रित्वा सरसीकं दा नृप पातव्याधसंकुले॥ राज्ञा विज्ञाप्यते कोऽत्र व्याधैश्च वहबोहताः क्षरोनैव
वराहास्ते विज्ञाः पेतुर्महीतले॥ तां दृष्ट्वा तु महद्‌ नादं व्याधाश्च कुः क्रुद्धदर्पिताः। धावंतः प्रमुदायुक्तोः
मिलिता यत्र भूपतिः॥ नानायायभटैर्भूपो निःसृताः सरसीतटान्। स्वपुरं गंतुकामोसौ ददर्श वा
न्यपि तापसं॥ ब्राह्मणं वृद्धहारीतं वैखानसपथे स्थितं। नियमैर्दुष्करैस्तैः परिक्षीणकलेवः
रं॥ तपसा कृशदेहं तं विस्फुरत्कर्कशत्वचां। दधानं हरिणं चर्मवसानं मृदुवल्कलं। कुर्वाणं
नियमं जाप्यं नत्वलोमजटाधरं। तं वनाश्रमिणं दृष्ट्वा मार्गदत्वा ससंभ्रमं॥ प्रणम्य शिरसा राजे
कृतपद्मांजलिस्थितं। पृथराज्ञामलंकारैर्द्विजो निश्चित्य मध्यमिपं॥ उवाच वत्से यसो हेतोः परोपः = १३५
कृतिवांछया॥ किमर्थं गम्यते राजन् काले स्मिन्नेतमे प्रभो॥ माघमासे विहायैव प्रातःस्नानं सरोवरे
सतलउवाच प्रत्युवाच ततो राजा नाहं जाने द्विजोत्तम॥ माघस्नानफलं कीदृक् तन्मे कथय विस्तरात्॥ व्यासउवा
च॥ इति भूपवचः श्रुत्वा प्राह वैखानसो मुनिः॥ भगवान्पुमणिः श्रीघ्रं प्रभ्यूदेति तमोहरं नृपस्ना

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नकालेप्यस्माकंनकथावसरोनृप॥त्वान्त्वागच्छवसिष्ठंत्वंपृच्छस्वस्यकल्मषं॥इत्युक्त्वातापसोमौनीप्रातःस्थि
तोयनिर्गतः॥उत्पात्तत्यदिलीपोपिनत्वात्वायथाविधि॥पुनःस्वनगरीञ्जोरोगतोसौहर्षपूरितः॥श्रांत
:पुरेनिवेश्याथवानप्रस्थकेषान्नृपः॥सूतउवाच॥भगवन्सनृपोगत्वाकिंचकारयथाविधि॥धर्मिष्ठैः
नवशिष्ठेनकथ्यतांतदाग्रतः॥व्यासउवाच॥श्वेताम्बरंरथमारूह्यश्वेतच्छत्रंचचामरं॥सानुकारःस्त्रुवा
साश्चसंवृतोमंत्रिभिःसह॥जयशब्दानुरभ्ररावन्दितोमागधवंदिभिः॥वशिष्ठस्याश्रमंयातोक्षषिवा:
कामनुस्मरन्॥तत्रैवगत्वाकुलर्षिविनयाचारपूर्वकं॥दत्तासनोगृहीतार्घःआसिर्भिःकृतमंगलः॥
सानंदंमुनिनापृष्टः॥कुशलंभूपसर्वदा॥ततोब्रवीद्वचोराजाहर्षयन्मुनिमानसं॥सोपिवैखानसेनो
क्तंपप्रच्छमधुराकृतिः॥दिलीपउवाच॥भगवन्त्वत्प्रसादेनश्रुताविस्तरतोमया॥श्रोत्राचारोदंडनी ॥३॥
तिश्चराजधर्माश्रयेपरे॥चतुर्णामपिवर्णानामाश्रमाणांचक्रियाःक्रियाः॥दानानितद्विधानानियः ॥मा॰म॰॥
ज्ञाश्चविधयस्तथा॥व्रतानितत्प्रतिष्ठाश्चविष्णोराराधनंतथा॥श्रुतानाश्रोत्तमिच्छमिमाघस्नानस्यतत्फलं॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गिरिः॥मणिकूटइतिख्यातोहेमरत्नशिलोच्चयः॥अधोर्ध्वंस्फटिकश्वेतोमध्यनीलशिलोगि
रिः॥महतिभिःसर्वतःश्लक्ष्णोनीलकंठइवावभौ॥सर्वत्रसनीलशिलोहेमरेखांतरांतरः॥स्फुरः
द्दिद्युत्वतःस्फटोजीमूतइवराजते॥मूर्ध्निनीलशिलाःशैलःसोऽर्धःकांचनमेखलः॥नारायणइ
वाभातिपरिपीतांबरावरः॥आमेखलंतुनीलाभोमध्येमध्येसितोपलः॥सतारकमिवव्योमश्रु
भ्रमेवमहीधरः॥लेख्यात्मनस्तुतुंगपदीप्तदिव्यौषधीधरः॥रंभापत्रपताकाभिःशोभतेसमर्द
वलः॥हरितोपलवैडूर्यपद्मरागसितासमनां॥नइंद्रनीलमंडलैःसोऽद्रिरिंद्रचापैरिवावृतः॥सर्वर्ध्व
तुमयैर्हेमैर्नानारत्नप्रभाशिरैवः॥सोऽग्निज्वालैरिवावृतैःशृंगैःसर्वत्रवेष्टितः॥तस्यागस्यनितं
बेधमगरणाकुशिलाकुंजाविद्याधर्यःप्रसेवतेस्वपतिकामनिवृत्ताः॥निरुद्धांतर्मरुन्मार्गाः
जितक्लेशाविरागिणः॥ध्यायंत्यहर्निशंबुद्धंतत्रस्यसानुगुहात्त्वचा॥साधकास्तत्रकाणःसिद्धाप्सुः
द्रौप्रीतिलोचनाः॥आराधयंतिमतेशांसुंदरीप्रवसिगुदरीप्रवा॥मंदारकुसुमामोदसुरभीः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतदिङ्मुखः ॥ स्तनन्निर्झरिणीवारिझंकारःप्रखरःसदा ॥ उपत्यकासुखेलद्भिर्वनाश्वैः कलभै
र्गजैः ॥ कस्तूरीमृगयूथैश्च चारुविभ्रमगैस्तथा ॥ विलसच्चामरैश्चैव विचित्रैः श्वापदैस्तथा ॥ नद
त्पारावतैश्चैव चकोरैश्चापि कोकिलैः ॥ राजहंसमयूरैश्च सदा रम्यः स पर्वतः ॥ हेमकूट इति ख्या
तो हेमरत्नशिलामयः ॥ सेव्यमानः सदा देवैर्गन्धर्वैः किन्नरोरगैः ॥ राजोवाच ॥ वदाश्चर्यमयः शैलः
सर्वर्तुकुसुमाश्रयः ॥ भगवन्कियदुच्छ्रायः कियदायामविस्तरः ॥ कपिल उवाच ॥ षट्त्रिंशत्तयो
जनान्युच्छ्रायो मस्तके दशयोजने ॥ आयामविस्तराभ्यां स मूले षोडशयोजनः ॥ हरिचंदनमंदार
तरुराजिविराजितः ॥ देवदारुद्रुमाकीर्णः सरलार्जुनशोभितः ॥ कालागुरुलवंगैलानिकुंजैः
श्च लतागृहैः ॥ विराजते गिरिः श्रेष्ठः सदा पुष्पफलप्रदः ॥ तं दृष्ट्वा पर्वतं रम्यं तदा दुर्भिक्षपीडित ॥५॥
॥ भृगुश्चकार तत्रैव वसतिं हृष्टमानसः ॥ तस्मिन्नतो हरेः शैले कंदरे च वने च ॥ चिरकालं तपस्ते ॥एमः॥
पे तपः सुचरितं मुनिः ॥ स्वर्वानिष्क्रतिराजेंद्र द्विजेश्वाश्रमवासिनी ॥ अवतीर्य गतो शैलात्तो विद्याध

२७ १ कपिलउवाच

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भाकाहं व्याघ्रमुखः पुमान्॥ इति वालराासं चिंत्यदस्यामित्यादिसर्वदा। इतिविद्याधरः प्रोक्तं श्रुत्वा वैश्य
कुनंदनः॥ त्रिकालज्ञो महर्षिः प्राह प्रहसंदिव्यलोचनः॥ शृणु विद्याधरश्रेष्ठ विचित्रं कर्मणः फलं॥ प्रा
प्य ज्ञानमुत्पत्तिमुत्पत्त्य ज्ञानवेतसः॥ माक्षिकापादमात्रं तु यथा हि विषमं विषं॥ क्रियाल्पविहितास्य
पि विपाके दारुणा तथा। उपोष्यैकादशी माघे तैलाभ्यंगं कृतं त्वया॥ द्वादश्यां प्राग्भवे देहे तेन व्याघ्रमु
खोभवत्॥ उपोष्यैकादशीं पूर्णां द्वादश्यां तैलसेवनात्॥ कुरूपं प्राप्तवान्देहं पराशेवनात्ः पुरूरवाः॥ ६
ष्टात्मनः कुकार्यं समस्तेन दुःखेन दुःखितः॥ गिरिराजं समागम्य देवतामरसत्सदे। स्थित्वा स परमः
प्रीत्या शुचिः स्नातः कृशासने॥ नवनीलघनश्यामं नलिनायतलोचनं॥ शंखचक्रगदापद्मधरं पी
तांवराहृतं॥ कौस्तुभेन विराजंतं वनमालाधरं हरिं॥ चिन्तयन्हृदये राजन्निगृहीताखिलेंद्रियः॥ ॥ ६॥
मासत्रयं निराहारस्तपस्तेपे सुदारुणं॥ शुल्येन तपसा तुष्टः सप्तजन्मकृतार्जनात्॥ संस्मारं स्तस्य रू ॥ राम:॥
पस्य सदेवेसत्तदा स्वयं॥ माघस्य शुक्लपक्षे तु द्वादश्यां मकरे रवौ॥ शांखाब्दिरसिषिं व्याघ्रमुदानंव
त्रावर्तितं॥ वासुदेवोदकैर्नत्वै स्मारयन्तैलचर्चितं॥ अतीवसुंदरं रूपं कमनीयं मनोहरं। येन तंच

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रदं पति॥ समागम्य मुनिं दत्वा स्थितौ तावतिदुःखितौ॥ तथाविधौ च तौ दृष्ट्वा मंजुवाक्यं द्विजो ब्रवीत्॥ व
द विद्याधरस्त्री त्वायुवां कीमितिदुःखितौ॥ श्रुत्वा तस्य मुनेर्वाक्यं प्राह विद्याधरो द्विजं॥ श्रूयतां तापसः
श्रेष्ठ मम दुःखस्य कारणं॥ पुत्रजन्म फलं प्राप्य प्राप्यापि त्रिदशालयांल्लब्धापि देवतादेहं मुखं वा
सुख्यमेभवत्॥ न जाने कर्मणः कस्य विपाकोऽयं समुपस्थितः॥ इति संस्मृत्य संस्मृत्य न लेभे शर्म मे मन
नः॥ श्रूयतां अयनान्वि पुत्रेण मे प्राप्तं कुलं मनः॥ जायेयं मम कल्याणी मधुवाणी स्वरूपिणी॥ नृत्यः
गीतकलाभिज्ञा सर्वसद्गुणशालिनी॥ यस्मिन्काले कुमारीयं तदेवाम रायानया॥ विपंच्या परिवा
दिन्यालं त्रीभिः सप्तभिर्दृशां॥ वीणावादिरसाभिज्ञः स्तोषितो नारदो मुनिः॥ मुग्धभावे पि गायंत्या
त्वनया रक्तकंठया॥ विचित्रस्वरनादज्ञो देवराजोपि तोषितः॥ अस्याः कौतुकभिन्नायाः वादयंत्या वि
पंचिकां॥ नानास्वरगतिस्निग्धं श्रुत्वा तं पंचमध्वनिं॥ ततो ब्रोन्दिन्नरोमांचोद्धुन्वन्मौलिं महेश्वरः॥
शीलौदार्यगुणग्राम रूपयौवनसंपदा॥ नानया सदृशी नाके काचिदस्ति नितंबिनी॥ केयं देवमुखीरं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधेयं यद्विधानेन तन्मे ब्रूहि मुने वद ॥ वशिष्ठ उवाच ॥ समस्त जन्तुं परं श्रेयो लोके हृदयहितावहं ॥
निर्मलीकरणं लोके मुनीनां वनवासिनां ॥ कृत्वा मुनीनां ये गतिं [illegible] प्रवंडिता ॥ कामयंते स्वर्ग
कातेस्नोनुसित्स्नानु सर्वदा ॥ विना वह्निं विना यज्ञमिष्टापूर्त्तं विना पिये ॥ वांछंति स्वर्गतिं स्नातं प्रातर्मा
घे वहिर्जले ॥ तिलाश्च वासांसि स्वर्णं धान्यादिकानि च ॥ ये दत्वैव छंति येनाकं ते माघे स्नान भूमि
प ॥ त्रिरात्रं उ वतैः कृच्छ्रैः याश्च केच निजान्नं ॥ अश्नोचो दृछंति येनाकं ते माघे स्नानं सर्वदा ॥ माघे स्नानं
नुयो धेनुं दद्यान्मर्त्यः परत्विनी ॥ नस्नायांवंति लोमानि यामांगे च नृपोत्तम ॥ तावद्वर्षसहस्राणि स्वर्गः
लोके महीयते ॥ माघस्नानं प्रकुर्वीणो यो [illegible] निर्मलो भा
ति वै नरः ॥ सर्वेषां धान्यराशीनां तिलाः पापप्रणाशनाः ॥ तस्मान्माघे प्रयत्नेन तिला देया नृपोत्तम ॥
माघस्नानं प्रकुर्वाणो दद्याद्ब्राह्मणभोजनं ॥ पितृन्संतर्प्य श्रद्धान्मा याति विष्णोः परं पदं ॥ तस्मात्सर्वं
प्रयत्नेन माघे दानेन नीयते ॥ अन्नदानं न क्षिपेन्माघे सर्वथा नृपसत्तम ॥ वित्तानुसारं ज्ञात्वा वै माघे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दानं सदा ददेत् ॥ माघस्नानं तु यः कुर्यादुपानह कमंडलुः ॥ ददाति ब्राह्मणोऽप्यश्रयः स्वर्गे शीतदाहयो
:प्रज्ञानन्दसन्तोषराजन् यावदाभूतसंप्लवे ॥ माघस्नानमयं राजन् कर्वोणास्तयमृतमं । दानं विना:
क्षिपेन्नैव दानात्सर्वमवाप्यते ॥ दानेन प्राप्यते स्वर्गो दानेन प्राप्यते सुखं । दानेन क्षीयते पापं महा
पातकजं नृप ॥ अदानं न तपो भाति शशसूर्यं गगने यथा । असंतत्याकुलं तद्वदाचारेण विनागृ
हं ॥ नातः परतरं किंचित्पवित्रं पापनाशनं ॥ विद्याधराय संगीतं भृगुणा मणिपर्वते ॥ राजोवाः २ २८
च ॥ उत्सलन्कदा भृगुर्विप्रो निरुगाद महीधरे । तस्मै धर्मोपदेशं च कथ्यतां मे कुतूहलं ॥ वशिष्ठ उवा
च ॥ अदशाब्दं पुरा राजन्नैव वर्ष वलाहकः । केनोद्विग्नाः प्रजाः सर्वाः गताः क्षीणा दिशो दश ॥ खि
लीभूते तथा मध्ये हिमवत्सह्ययोर्नृपः । स्वाहास्वधावषट्कार वेदाध्ययन वर्जिते ॥ सोपप्लवे तद ॥४॥
लोके लुप्त धर्मे वनिः प्रभे । फलमूलान्नपानीयश्नेवै भूमिमंडले ॥ विंध्यपादतरुछन्नादस्मात्ः ॥राम॥
रेवावराश्रमात् । सह शिष्यैश्च निर्गत्य हिमाद्रिराजते भृगुः ॥ तत्रातिष्ठति कैलाशगिरेः पश्चिमतोः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कमे देवी उर्वशी देवनायिका। इत्युक्तं लब्ध्वा वरो राजा कृतः कृत्यपरं गतः। इति कर्मगतिं ज्ञात्वा किं
विद्याधर स्थितस्तेन। भवान्परिजिहीर्षुश्च दानतस्य विरूपतां॥ शीघ्रं मद्वचनादेव प्राचीनाघविनाशनं॥ मा
घमासे कुरु स्नानं मणिकूटनदीजले। ऋषिभिर्द्विजैर्जुष्टे कथयामि च तद्विधिं॥ तव भाग्यवशान्मा
घो निकटः पंचमे हनि। पौषस्यैकादशी शुक्ला यावद्विद्याधरोत्तमः॥ मासमेकं निराहारः त्रिकालस्ना
नमाचरन्। त्रिकालमर्चयन्विष्णुं सत्यलोभोजितेंद्रियः॥ ततो निर्दग्धपापं त्वां द्वादश्यां पारणे वा
सरे। समिद्भिर्वाग्नौ वैष्णवैर्मंत्रपूतैरहं शरः॥ कामक्रोधमं वक्रां करिष्यामि तवानघा देवतां व
दनो भूत्वा त्वं विद्याधरसत्तम॥ स्नानयाव रवर्णिन्यास्सार्धं क्रीडयथासुखं॥ ज्ञानमाघप्रभावस्त्वं
माघस्नानं सदा कुरु॥ इत्युक्त्वा महामुनिस्तस्मै धर्मज्ञो नमस्तस्मै नाविद्याधरायराजेंद्र प्रनर्गाथा उद
हृता॥ माघस्नाने [illegible] नाशो माघस्नानेरघक्षयः॥ सर्वव्रताधिको माघः सर्वदानफलप्रदः॥ माघो
गर्जति यज्ञेभ्यो माघो योगान्गर्जति। तीर्थाच तपसो माघो मोवि विद्याधर गर्जति। पुष्करे च कुरु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा॰म॰
॥७॥

ष्टेत्रेवृत्तावर्त्ते पुष्करके। गुविर्मुक्ते प्रयागे च गंगासागरसंगमे॥ यत्फलं दशभिर्वर्षैः प्राप्यते नि
यतैर्नरैः॥ तत्फलं प्राप्यते माघे त्र्यहस्नानान्न संशयः॥ स्वर्गभोगे चिरं रागो येषां मनसि वर्त्तते। य
त्र कापि जले स्नानं तु त्याज्यं माघमज्जनं॥ ये विमुंचंति नरकाध्वे द्वे रिद्धाय्यैस्मासंति च। सर्वथा
तैः प्रयत्नेन माघे कार्यं निमज्जनं॥ दारिद्र्यपापदौर्भाग्यपंकप्रक्षालनाय वै। माघस्नानान्न चान्यो
स्ति उपायः सुरसत्तमः॥ श्रद्धाहीनानि कर्माणि मतान्यल्पफलानि वै। फलं ददाति संपूर्णं माघस्ना
नं यथा तथा॥ सुकामो वा सकामो वा यत्र कापि नहि जले। इहामुत्र च जंतुः स्यानि माघस्नायीन पश्यपुः
ति॥ पक्षवृद्धे यथा चंद्रः क्षीयते वर्द्धते तथा। पातकं क्षीयते माघे पुण्यराशिश्च वर्द्धते॥ यथाब्धौ
खलु जायंते रत्नानि विविधानि च। आयुर्वर्तिकलत्राणि संपदः प्रभवंति च॥ कामधेनुर्यथा का ॥७॥
मं चिंतामणिश्च चिंतितं। माघस्नानं ददातीह तद्वत्सर्वमनोरथान्॥ कृते तपः परं ज्ञानं त्रेतायां ॥रामः॥
यज्ञं तथा। द्वापरे तु कलौ दानं माघः सर्वयुगेषु च॥ सर्वेषां सर्ववर्णानामाश्रमाणां च मन्यते।

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माघस्नानं तु धर्मस्य धाराभिः खलु वर्षति ॥ इति वाक्यं भृगोः श्रुत्वा तस्मिन्नेवाश्रमे सुराः ॥ सहैव
भृगुणा माघे गिरिनिर्झरिणीह्रदे ॥ यथोक्तविधिना स्नानमकरात्कार्यमात्मसह ॥ भृगोरनुग्रहात् सोथ
संप्राप्य मन्त्रसेविनं ॥ देवतावन्दनो भृत्वा सुमुदे मणिपर्वते ॥ आजगाम भृगुर्विद्वान् तन्मन्त्रं ग्राः
सहर्षितः ॥ मणिमयगिरिसिंधौ स्नानमात्रेण माघे मदनवदनरूपस्तत्र विद्याधरो भूत् ॥ क्षपि
ततियमदेहो विंध्यपादावतीर्णो भृगुरपि सहशिष्यैराजगामाथ रेवां ॥ सुरविलयवनसारं माघ
माहात्म्यमेतद् द्विजवर भृगुणोक्तं भूपविद्याधराय ॥ विविधफलविचित्रं यः शृणोतीह नित्यं स
चिरसकलकामान्देववत्प्राप्नुयात्सः ॥ ४ ॥ इति श्री पद्मपुराणे उत्तरखंडे वशिष्ठदिलीपसंवादे ष
ष्ठमोध्यायः ॥ ६ ॥ वशिष्ठ उवाच ॥ अधुना माघमाहात्म्यं प्रवक्ष्यामि नृपोत्तम ॥ पृष्टदत्ते कार्तवीर्याः
यद्दत्तात्रेयादितं यथा ॥ दत्तात्रेयं हरिं साक्षाद्वसंतं सह्यपर्वते ॥ प्रणम्य तं द्विजं गत्वा राजा माहि
ष्मतीपतिः ॥ सहस्रार्जुन उवाच ॥ भगवन् योगिनां श्रेष्ठ सर्वधर्मा मयाश्रुताः ॥ माघस्नानफलं ब्रू

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हि कृपया मम प्रब्रुत॥ दत्तात्रेय उवाच॥ श्रूयतां राजशार्दूल सेतत्प्रश्नोत्तरं शुभं। ब्रह्मणोक्तं
पुरा ह्येतन्नारदाय महात्मने॥ तत्सर्वं कथयिष्यामि माघस्नानफलं महत्॥ यथा देशं यथा तीर्थं यथाका-
लं यथाक्रियं॥ अग्निं प्रचारिते वर्षे कर्मभूमौ विशेषतः। अमाघस्नायिनां नृणां निःफलं जन्मकी-
र्त्तितं॥ अलक्ष्यं गगनं यद्वद्देवेन्द्रमण्डलं न च भाति सत्कर्म माघस्नानं विनानृप॥ व्रतदानैस्तपो-
भिश्च न तथा प्रीयते हरिः। माघमज्जनमात्रेण यथा प्रीणाति केशवः॥ न समं विद्यते किंचित्तेजः सौ-
रेण तेजसा। तद्वत्स्नानेन माघस्य न समाः क्रतुजाः क्रियाः॥ प्रीतये वासुदेवस्य सर्वपापापनुत्तये।
माघस्नानं प्रकुर्वीत स्वर्गलाभाय मानवः॥ किं रक्षितेन देहेन सुपुष्टेन बलीयसा। अध्रुवेणापि
विनेह माघस्नानं विना भवेत्॥ अस्थिस्तंभं स्नायुयुतं मांसक्षतजलेपनं। चर्मावनद्धं दुर्गन्धिपू-
र्णं मूत्रपुरीषयोः॥ जराशोकविपद्व्याप्तं रोगमंदिरमातुरं। रजस्वलमनित्यं च सर्वदोषसमाश्र- ॥८॥
यं॥ परोपतापि पापान्वि परद्रोहि परेर्ष्यकं। लोलुपं पिशुनं क्रूरं कृतघ्नं क्षणिकं तथा॥ दुःपूरं: ॥रामः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्द्धरं दुष्टं दोषत्रयविभूषितं । मूत्रविष्ठाविषदिग्धं तापत्रयविमोहितं ॥ निसर्गतोऽधर्मरतं
तृष्णाशतसमाकुलं । कामक्रोधमहालोभनरकद्वारसंस्थितं ॥ कृमिवर्च्चस्कभस्मादिप
रिणामं प्रणीं हविः ॥ ईदृक्शरीरकं व्यर्थं माघस्नानविवर्जितं ॥ बुद्बुदा इव तोयेषु पुत्तिकं
इव जंतुषु जायंते मरणायैव माघस्नानविवर्जिताः ॥ अवैष्णवो हतो विप्रो हतं श्राद्धमयो
गिकं । अब्रह्मण्यं हतं क्षेत्रं अनाचारं हतं कुलं ॥ सदंभश्च हतो धर्मः क्रोधेन च हतं तपः । अ
दृढं च हतं ज्ञानं प्रमादेन हतं श्रुतं ॥ गर्वमत्ता हता नारी ब्रह्मचारी न याहतः । अदीप्तेग्नौ हुतो होमो हता
प्रजिरसाक्षिका ॥ उपजीव्या हता कन्या स्वार्थे पाका क्रिया हता ॥ शूद्रभिक्षो हतो यागः कृपण
स्य हतं धनं ॥ अनभ्यासहता विद्या हतो राजा विरोधिकृत् ॥ जीवनार्थं हतं तीर्थं जीवनार्थं
हतं व्रतं ॥ असत्या च हता वाणी तथा पिशुनवादिना ॥ संदिग्धश्च हतो मंत्रो व्यग्रचित्तो
हतो जपः ॥ हतमश्रोत्रिये दानं हतो लोकश्च नास्तिकः ॥ अश्रद्धया हतं सर्वं यत्कृतं पारलौ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा॰म॰

॥९॥ किंकं। इह लोके हतो नृणां दारिद्र्येण यथा नृप। मनुष्याणां तथाजन्ममाघस्नानं विना हतं॥ः
मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ॥ कथं पापैः प्रमुच्येत कथं स्वर्गं दिवं व्रजेत्॥ ब्रह्महा
हेमहारी च सुरापो गुरुतल्पगः। माघस्नायी विपापः स्यान्तत्स्वर्गी वपं वसः॥ माघमासे रटंत्या
पः किंचिदभ्युदिते रवौ॥ ब्रह्मघ्नं वा सुरापं वा कं पतंतं पुनीमहे॥ उपपातकानि सर्वाणि पातकानि
निमहांति च। भस्मी भवंति सर्वाणि माघस्नायिनमानवे॥ वेपंते सर्वपापानि माघमासस॰
मागमे। वाश कालो यमस्माकं यदि स्नास्यति वारिणी॥ पावका इव दीप्यंते माघस्नानैर्नरोत्तमाः
विमुक्ताः सर्वपापेभ्यो मेघेभ्य इव चंद्रमाः॥ स्नायी भुक्त्वं लघुस्थूलं वाङ्मनःकर्मभिः कृतं। माघ॰
स्नानं दहेत्सर्वं पावकः समिधो यथा॥ ज्ञानमादिकं चानंत्सर्वं ज्ञानीजानेकृतं वयं त। स्नानमा ॥९॥
त्रेण तन्नास्ति मकरस्थे दिवाकरे॥ निःपापास्त्रिदिवं यांति पापिष्ठा यांति शुद्धतां। संदेहो नात्र ॥रामः॥
कर्तव्यो माघस्नानान्नराधिपः॥ सर्वेऽधिकारिणो ह्यत्र विष्णुभक्तो यथा नृप। सर्वेषां स्वर्गदो माघ

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ःसर्वेषांपापनाशनः॥एषएववरोमंत्रोलोकेष्वेवपरंतपः।प्रायश्चित्तंपरंचैतन्माघस्नानमनुत्तमं॥ः
नृणांजन्मांतराभ्यासान्माघस्नानेमतिर्भवेत्।श्रध्यात्मज्ञानकौशल्यंजन्माभ्यासात्तथानृप॥संसार
कर्द्दमालेपप्रक्षालनविशारदं।पावनंपावनानांचमाघस्नानंपरंतप॥स्नातामाघेनयेराजन्सः
र्वकामफलप्रदे।नेकथंभुंजतेभोगान्चंडसूर्यग्रहोपमान्॥श्रृणुराजन्महापुण्यंप्रभावंमाघम
सजं।ऋषिकानीमकल्याणीब्राह्मणीभृगुवंशजा॥बालवैधव्यदुःखार्त्तानतप्तेपेसुदुष्करं॥विंध्य
पादेमहापुण्येकावेरीवायामकरंटके॥तत्रसाव्रतिनीभूत्वानारायणपरायणा।सदाचारवतीनित्यंनि
र्त्यसंगविवर्जिता॥जितेंद्रियाजितक्रोधासत्यवागल्पभाषिणी।सुशीलादानशीलाचदेहशोषण
तत्परा॥पितृदेवद्विजेभ्यश्चदत्वाहुत्वातथानले।षष्ठेकालेचसाभुंक्तेस्वुदृत्यासदानृप॥के
श्रुतिकृच्छ्रपराकैस्तप्तकृच्छ्रादिकैर्व्रतैः।ऊएणानयतिसामासान्नर्मदायाश्चरोधसि॥एवंतयात
पस्विन्यावल्कलिन्यासुनेत्रयासुमहासत्वसौलिन्याधृतिसंतोषयुक्तया॥षष्टिर्माघास्तयास्ना

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नारेवाकपिलसंगमे। ततः सा तपसा क्षीणा तस्मिन्तीर्थे मृता नृप॥ माघस्नानजपुण्येन गता तावै सवैष्ण
रेऽडवासप्रहृष्टा चतुर्युगसहस्रकं॥ सुंदोपसुंदनाशाय पश्चात्सा पद्मभुवा पुनः॥ तिलोत्तमेति नाम्नाः
सा ब्रह्मलोके न नारिता॥ तेनैव पुण्यशेषेण रूपेकायतनं ययौ॥ स्वयोनिजा वलायत्वं देवानामपि मोहि
नी॥ लावण्यह्लादिनी तन्वी साप्सरसां वरा॥ निर्गुणास्त्वविधेः सृष्टेनूनमाश्चर्यकारिणी॥ तामुत्तं
शविधाता वै नृषोऽनुज्ञां तदाददौ॥ त्वमाशश्वाक्षिगच्छ त्वं दैत्यनाशाय सत्वरं॥ ततः सा ब्रह्मणो लोकाद्धीः
णमादाय भामिनी॥ गता पुष्करमार्गेण यत्रतौ देववैरिणौ॥ तत्र स्नात्वा सरोवरायाः पवित्रे निर्मले जले॥
परिधायांवरं रक्तं वंधूककुलमप्रभं॥ रणद्वलयिनी चारुसिंजन्नूपुरमेखला॥ लोलमुक्तावलीकंठे
चलकुंडलशोभिता॥ माधवीकुसुमापीडा कंकेरीविटपे स्थिता॥ गायंती मधुरस्वरं साधुवादयंती विपंचिः ॥१०॥
हस्तकी॥ मूर्द्धयंती स्वरं रवड्ङं स्निग्धकोमलकलां इहंतिलो नमावाल्लातिष्टत्यशोककानने॥ द ॥मा०म:॥
ष्ट्वा दैत्यभटैरिंदोः कलेव स्वच्छदाहृदि॥ तां दृष्ट्वा विस्मिता राजन्मार्तंडैः सेनिकैर्भृशं॥ त्वरमाणौ रयेड्द्रे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वगत्वा तु सुंदोपसुंदयोः॥ कथितास्तं भुमेरौव वर्णयित्वा पुनः पुनः॥ हे दैत्यौ न जानीमो देवी वा कांनवी नु किं
नागांगनाथ यक्षी वा स्त्रीरत्नं सर्वथा तु सा॥ युवां रत्नभुजौ लोके रत्नमतां तु सा वला॥ वर्त्तते नातिदूरे गे
गुशौ केशौ करहारिणी॥ गत्वा तु पश्यतां शीघ्रं मन्मथस्यापि मोहिनी॥ इति सेनापतीनां तान्श्रुत्वा वं
वं मनोहरां॥ चचकुं सीधुतस्सत्वा विहाय जलसेवनं॥ उन्मत्तौ सहस्त्रा गिसत्वा तु स्मरः ज्ञातलाशि
तौ॥ सतभारायसी क्रूरा कालदंडोपमां गदां॥ भिन्नाभिन्नां गृहीत्वा तौ जवेनातिप्लुतं गतौ॥ यत्र शृंग
रसज्ञा सा हंतुं चंडीवसं स्थिता॥ सजन्सिंधुक्षयं तीव दैत्ययोर्मन्मथानलं॥ स्थित्वा तस्याः पुरोजातौ
तद्रूपेनाविमोहितौ॥ विशेषात्कामधुना मत्तौ बूचतुस्तौ परस्परं॥ भ्रातर्विरम भार्येयं ममास्तु वरवर्णि
नी॥ त्वमेवार्यत्ता जेमां मे भार्या सुमदिरेक्षणा॥ इत्याग्रहेण संरब्धौ मातंगाविव सोन्मदौ॥ गृहीत्वा ना
कालनिर्द्दिष्टौ गदया जघ्नतुस्तदा॥ परस्परप्रहारेण गतासू पतितौ भुवि॥ तौ मृतौ सैनिकैर्दृष्ट्वा
कृतः कोलाहलो महान्॥ कालरात्री समाके यंहा किमेतदुपस्थितं॥ एवं वदन्तु सैन्येषु दैत्यो सुंदो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चदकौ॥ ध्यानयित्वा गिरेः शृंगं कुदिनी वति लोत्तमा॥ प्रस्थिता गगनं शीघ्रं द्योतयंती दिशो दश॥ दे:
वकार्यं ततः कृत्वा गत्वासा ब्रह्मलोकं तिकं॥ ततः तुष्टेन देवेन विधिना सा तु मोदिता॥ स्थानं सूर्यरः
थे दत्तं नव वं ऽ जा तु नेमया॥ भुक्त्वा भोगाननेकांस्त्वं यावत्सूर्यो वरे स्थितः॥ इत्थं सा ब्राह्मणी राजन्मे
त्वा चाप्सरसां वरा॥ भुंक्ते ह्यपि रवेर्लोके माघस्नानफलं महत्॥ तेन प्रयत्नतो राजन्नृषः ध्यानैः
सदा नरैः॥ स्नातव्यं मकरादित्ये वांछद्भिः परमां गतिं॥ तेनापि सत्तमो नास्ति पुरुषार्थोऽत्र कथ्यते॥
नाक्षीरां पानकं किंचिन्माघे मज्जति यो नरः॥ तुलयंति न ते तत्र यज्ञाः सर्वे सदक्षिणाः॥ माघस्नाने
न राजेन्द्र तीर्थेष्वेव विशेषतः॥ न चान्यत्स्वर्गदं कर्म न चान्यत्पापनाशनं॥ न चान्यन्मोक्षदं राजन् माघः
५८ माघे पञ्चदश स्नानसमं महत्॥ अत्रैव कीर्त्तयिष्यामि इतिहासं पुरातनं॥ पुराकृतयुगे राजन्नैषधे नगरे वरे॥ अ
सीद्वैश्यः कुवेराभो नाम तो हेमकुंडलः॥ कुलीनः सत्क्रियोपेतो देवब्राह्मणपूजकः॥ कृषिवा[illegible] ॥११॥
कर्त्ता सवकुधान्यस्य विक्रयी॥ गोघोटकमहिष्यादियोनिपोषणतत्परः॥ नाव यो दधीनि तक्रा[illegible]ः ॥राम:॥
गोमयानि तृणानि च। काष्ठानि फलमूलानि लवणानि च पिप्पली॥ धान्यानि शाकतैलानि वस्त्राणि वि

अन्नकामात्स्यात पुत्रकामा॰॰॰ मुराहृतं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधाम्निवा॥ धातुनिष्कृत्विकारांश्च विक्रिणीते स सर्वदा॥ इत्थं नानाविधैर्वैश्य उपायैः परमोत्तमाऽर्प
र्जयामास धनमष्टौ हाटककोटयः॥ स्वं महाधनेशोथ श्राकर्णीपलितोऽभवत्॥ पश्चाद्विचार्य संसार
क्षणिकत्वं स्वचेतसि॥ तद्धनस्य षडंशेन धर्मकार्यं चकार सः॥ विष्णोरायतनं चक्रे चक्रे गेहं शिवस्य च
॥ तडागं खानयामास विपुलं सागरोपमं॥ वाप्यश्च पुष्करिण्यश्च बह्व्यस्तेन कारिताः॥ वटाश्वत्थाम्र
कंकेलिजंबूनिंबादिकाननं॥ आरोपितं सुसत्वेन तथा पुष्पवनं शुभं॥ उदयास्तमयं यावदन्नदानैः
चकार सः॥ पुराद्बहिश्च तु दिक्षु प्रपाश्चक्रे ति शोभनाः॥ पुराणे श्रुतिसिद्धानि यानि चान्यानि भूपते।
दत्तौ तानि स धर्मात्मा नित्यं दानपरस्तथा॥ यावज्जीवकृते पापे प्रायश्चित्तं तथाकरोत्॥ देवपूजा
रतो नित्यं नित्यं चातिथिपूजकः॥ तस्येत्थं वर्त्तमानस्य जज्ञाते द्वौ सुतौ नृप। तौ च प्रसिद्धनामानौ श्री
कुंडलविकुंडलौ॥ तयोर्मूर्ध्नि गृहं त्यक्त्वा जगाम तपसे वनं॥ तत्राराध्य परं देवं गोविंदं वरदं विभुं॥
तपःक्लिष्टशरीरोसौ वासुदेवमनाः सदा॥ प्राप्तवान्वैष्णवं लोकं यत्र गत्वा न शोचति॥ अथ तस्य सुतौ तौ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजन्मदमानसमन्वितः। नरः पौरुषसंपन्नो धनगर्वेण गर्वितः॥ दुःशीलो व्यसनासक्तो धर्मकर्मविदू
षको। न वाकां शृणुते मातुर्वधूनां वचनं तथा॥ दुर्मार्गगो दुरात्मा नो पितृमित्रनिषेधको। धर्मनिर
तो दुष्टो परदाराभिगामिनो॥ गीतवादित्रनिरतो वीणावेणुविनोदितो। वारस्त्रीशतसंयुक्तो गायंतोः
वेरनृत्तका॥ चाटुवादिनरैर्युक्तो विटगोष्ठीविशारदो। सुवेशो चारुवसनो चारुचंदनभूषितो॥ सुर
भिमाल्यमालाढ्यो कस्तूरीलक्ष्मलक्षितो। नानालंकारशोभाढ्यो मौक्तिकाहारहारिणो॥ गजवाजिरथै
श्चैव क्रीडंतो चेरनृत्तदा। मधुपानसमायुक्तो वारस्त्रीरतिमोहितो॥ नाशयंतो पितुर्द्रव्यं सहस्रं ददः
तो प्राते। नस्पनुः स्वगृहे रम्ये नित्यं भोगपरायणो॥ इत्थं नु तद्धनं ताभ्यां विनियुक्तः मस सर्वशः। वारस्त्री
विशेषरूपमदृष्ट्वा वारणं वंदिषु॥ सुपात्रे तद्धनं दत्तं क्षिप्तं बीजमिवोखरे। नसत्पात्रेषु तद्दत्तं नब्राह्म
णेभ्य एव कृतं॥ नार्चितो भूतभृद्विष्णुः सर्वपापप्रणाशनं। तयोरेवं तु तद्द्रव्यं मचिरात्क्षयं गतं॥ ततः ॥१२॥
स्तौ दुःखमापन्नौ कार्येण परमं गतौ। शोचमानौ तु महतीं चिंतां दुःखदुःखितौ॥ तयोस्तु तिष्ठतोः ॥राम:॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

४१
६ ऋषिरुवाच

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰म॰
॥१२॥ मार्कण्डेय हि स्वर्गं ददामि ते । भुंक्ष्व भोगान्महादिव्यांस्त्वमर्जितान्स्वेन कर्मणा ॥ ततो दूतमनाः सोपि दूतं पप्रच्छ तं
तदा । सन्देहं तु कृत्वा तु विस्मयपरमं गतः ॥ विचार्य तु दिवं स्वर्गं कस्य हेतोः फलं मम ॥ विकुंडल उवाच ॥
भो दूत वरं पृच्छामि संशयं त्वां महत्तरं ॥ आवां जातौ कुले तु ह्येकस्मिन्कर्म तथा कृतं ॥ दुर्मनुरिपितुसोम
तुल्यं हि द्वेयमस्त्यथा ॥ कथं स नरके क्षिप्तस्तुल्यकर्मा सभात्रजा मम भावी कथं नाक इति मे छिंधि संशयं ॥
देवदूत नमस्यामि स्वस्त्यस्वर्गस्य कारणं ॥ यमदूत उवाच ॥ माता पिता सुतो जाया स्वसा भ्राता विकुंडल ॥
जन्महेतुरियं संज्ञा जन्मकर्मोपभुक्तये ॥ एकस्मिन्नादधे ये च [illegible] नानां समागमः ॥ पुत्रभ्रातृपितृणां च
तथा भवति संगमः ॥ ते वा यद्वद्धि सत्कर्म कुरुते पूर्वभावितः ॥ तस्य तस्य फलं भुंक्ते कर्मणः पुरुषा सत्
यामस्तं वदामि तच्छ्रीमान्नरः कर्म शुभाशुभं ॥ स्वकृतं भुज्यते वैश्य काले काले पुनः पुनः ॥ एकः करोति ॥१२॥
कर्माणि एकस्तत्फलमश्नुते ॥ अन्यो न लिप्यते वैश्य कर्मणान्यस्य कुत्रचित् ॥ स्वपतन्नरके पापैस्तव ॥ रामः ॥
भ्राता सुदारुणैः ॥ त्वं च धर्मेण धर्मात्मा स्वर्गमाप्नोषि शाश्वतं ॥ विकुंडल उवाच ॥ आबाल्यादंतपर्यंतं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गेहे नास्ति तत्कुर्वते तदा। स्वजनैर्बांधवैः सर्वैः सेवकैरुपजीविभिः। द्रव्याभावे परित्यक्तो निर्यमानोत
तः पुरे। पश्चाच्चौर्यसमारब्धंनाभ्यांतु नगरे नृपे॥ राजतो लोकतो भीतौ स्वगृहान्निर्गतौ तदा। वक्रातुर्वनना
संतौ सर्वेषां मत्प्राणपीडितौ। जघ्नतुः सततं म्लेच्छाग्निर्तेर्वा रोगैः विषार्पितैः। नानायक्षिवराहांश्च हरिणान्नरो
हितांस्तथा॥ शशकान्नुशल्लकीगोधान्श्वापदांश्च तथा वृकान्। महाबलोमि हन्त्र संगावारे वटं करतो स
दा। एवं मांसमयाहारौ पापाचारौ परं तथा। कदाचिन्मधुरं प्राप्तुः एको न्यश्च वनं गतः॥ शार्दूलेन हतो
ज्येष्ठः कनिष्ठः सर्पदंशितः। एकस्मिन्दिवसे राजन् पापिष्ठौ निधनं गतौ॥ यमदूतैः स्ततो बध्वा पाशेनी
तौ यमक्षयं। गत्वाभिजगदुः सर्वे ते दूताः पापिनाविमौ॥ धर्मराज नरावेतावानीतौ तव शासनात्। आ
ज्ञां देहि स्वमस्मेभ्य प्रसीद करवाम किं॥ आलोक्य चित्रगुप्तेन तदा दूतान् जगौ यमः। एकस्तु नीयतां घोरं
नियं तीव्रवेदनं॥ अपरस्याप्यतां स्वर्गे यत्र भोगाननुत्तमाः। कृतांताज्ञां तदा प्राप्य दूतैश्च क्षिप्रकारि
भिः॥ क्षिप्तो सौ नरके घोरे तयोर्ज्येष्ठो नराधिपः। तेषां दूतवरः कश्चिदुवाच मधुरं वचः॥ विकुंडलमया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰ म॰ लोकं न पश्यन्ति कर्मणा केन मानवाः ॥ गच्छंति निरयं येन तन्मां त्वं कृपया वद ॥ यमदूत उवाच ॥ सम्यक् पृष्टं त्वया
॥१४॥ वैश्यं न च पापोसि मां प्रति ॥ विष्णुभक्तेर्हृदये पुंसां बुद्धिः श्रेयसि जाता । यस्य व्यवसरो नास्ति मम सेवापरस्य वै ॥ त
थापि तव स्नेहात्प्रवक्ष्यामि यथामति । कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ॥ परपीडां न कुर्वंति न ते यां
ति यमालयं ॥ न वेदैर्न च दानैश्च न तपोभिर्न चाध्वरैः ॥ कथंचित्सुगतिं यांति पुरुषाः प्राणिहिंसकाः ॥ अहिं
सा परमो धर्मो ह्यहिंसैव परं तपः ॥ अहिंसा परमं दानं इत्याहुर्मुनयः सदा ॥ मशकान्मत्कुणान्दंशान् यूकः
कादि प्राणिनस्तथा ॥ आत्मौपम्येन रक्षंति मानवा ये दयालवः ॥ न श्वांगारमयं कीलं मार्गे प्रेतां तरंगिणीं
॥ दुर्गतिं न हि पश्यंति कृतांतस्य च ते नराः ॥ भूतानि येऽत्र हि संति जलस्थलचराणि वा ॥ जीवनार्थं हि
ते यांति कारागृहं च दुर्गतिं ॥ स्वमांसभोजनात्तत्र पूयशोणितपेरणया ॥ मज्जोत्थवसामांसं केदंष्ट्राः ॥१८॥
कीटैरयोमुखैः ॥ परस्परं च खादंतो धावंतोऽन्योन्यघातिनः ॥ वसंति कल्पमेकं ते नरतं तो दारुणे रवे । ॥राम:॥
नरकान्निर्गता वै ये स्थावरास्तु चिरं तते ॥ न तो मुच्यंते ते क्रूराः तिर्यग्योनिषु ते भुवा । पश्चाद्भवंति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ममपापैरतंमनः॥अस्मिञ्जन्मनिमोहेनदुष्कृतंहिकृतंमया॥देवदूतनजानामिपूर्वकृतंकर्मचात्म
नः॥यदिजानासिमत्पुण्यंतत्सर्वंकथययावदा॥दूतउवाच॥शृणुवैश्यप्रवक्ष्यामियत्त्वयापुण्यमर्जितं
॥जानामिनदहंसर्वंनत्वंवैश्यपुनिश्चितं॥हरिमित्रसुतोविप्रःसुमित्रोवेदपारगः॥आसीत्तस्याश्र
मंपुण्येयमुनादक्षिणेतटे॥तेनतस्मिन्वनेसख्यंतवजातंविशांवर॥तत्संगेनत्वयास्नानंमाघमा
सद्वयंतथा॥कालिंदीपुण्यपापाणिसर्वपापहरेवरे॥तत्तीर्थेलोकविख्यातेनाम्नापापप्रनाशने॥ए
केनसर्वपापेभ्योविमुक्तस्त्वंविशांवर॥द्वितीयमाघपुण्येनप्राप्तंस्वर्गस्त्वयानघ॥त्वंतेनपुण्यभा
वेनमोदस्वसततंदिवि॥नरकंतुनवप्रातासहतेयमयातनां॥छिद्यमानोसिपत्रैश्चभिद्यमानश्चमु
द्गरैः॥चूर्णमानःशिलापृष्ठेनक्षारागारेषुमज्जितः॥इतिदूतवचःश्रुत्वाभ्रातृदुःखेनदुःखितः॥पुल
कांकितसर्वांगोदीनोसौविनयान्वितः॥उवाचदेवदूतंतंमधुरंनिपुणंवचः॥मैत्रीसप्तपदीसाधोसतांम
तिसत्फला॥मैत्रभावंविचिंत्याथमामुपाकर्तुमर्हसि॥त्वत्तोहंश्रोतुमिच्छामिसर्वज्ञस्त्वंमतोमम॥यमः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तज्ज्ञान्यां कारणैः कृत्वाप्यथ यं गतः ॥ दरिद्राश्चुंगहीनाश्च मातृघ्नाः प्राणिहिंसकाः । तस्माद्वैश्यपरद्रोहं
कर्मणा मनसा गिरा ॥ लोकद्वयेषु रेव कुर्याद्धर्मज्ञो न समाचरेत् । लोकद्वये न विंदंति सुखानि प्राणिहिं
सकाः ॥ ये न हिंसंति भूतानि न ते बिभ्यति कुत्रचित् । प्रविशंति यथा नद्यः समुद्रमृजु वक्रगाः ॥ सर्वे ध
र्मा ह्यहिंसायां प्रविशंति तथा दृढं ॥ स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दक्षितः ॥ अभयं येन सर्वेषु दत्तमः
त्र विश्वां वरानि जानिजांश्च शास्त्रात्तान वर्णधर्मांश्च निर्मिता नृ ॥ पालयंतीह ये वैश्या न ते यांति यमालयं ॥ बृ
ह्मचारी गृहस्थाश्च वाणप्रस्थो यतिस्तथा ॥ स्वधर्मनिरताः सर्वे नाकपृष्ठे वसंति ते ॥ यथोक्तकारिणः सर्वे
वर्णाश्रमसमन्विताः ॥ नरा जितेंद्रिया यांति ब्रह्मलोकं च शाश्वतं ॥ दुष्टा पर्त्तरं नार्थे च पंच यज्ञरताश्च ये ॥
दयान्विताश्च ये नित्यं नेक्षंते ते यमालयं ॥ इंद्रियार्थे निवृत्ताये समर्था वेदवादिनः ॥ अग्निपूजारता नित्यं ते
विप्राः स्वर्गगामिनः ॥ शूद्रीन वादिनः शूराः शत्रुभिः परिवेष्टिताः ॥ आहवेषु विपन्ना ये तेषां स्वर्गो दिवाक
रः ॥ अनाथस्त्रीद्विजार्थे च शरणागतपालने ॥ प्राणान्स्त्यजंति ये वैश्य ते मोदंते समादिवि ॥ गां दृष्ट्वा पंकनि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा॰म॰ ॥२५॥

र्भिग्नारोगमग्नं द्विजं तथा॥ उद्धरंति नराये तु तेषां स्वर्गोऽश्वमेधिनां। गोत्रासं ये प्रयच्छंति शृंगपंते पिपासः स
दा॥ ये नारोहंति गोपृष्ठे ते स्युः स्वर्गलोकवासिनः। गर्त्रमात्रं तु ये कुर्याद्यावत्कोविन्नरत्विभवेत्। यमलोकमदृ
ष्ट्वा तु जलस्थलचराः सदा। यथा यथा च पानीयं पिबंति प्राणिनो भृशं॥ तथा तथाऽक्षयः स्वर्गो धर्मकृत्या विशां
वरः। प्राणिनां जीवनं वारि प्राणा वारिणि संस्थिताः॥ तत्प्रपां ये प्रयच्छंति ते दिव्यंति सदा दिवि। अश्वत्थमेकं
पिचुमंदमेकं दशचिंचिनी कुंकपित्थबिल्वामलकत्रयं च पंचाम्रवापी नरकं न पश्येत्॥ वरं भूमिरुहा पंच
न तु कोऽप्सहादशः॥ पत्रैः पुष्पैः फलैर्मूलैः कुर्वंति पितृतर्पणं। न तत्करोत्यग्निहोत्रं सुकृतं पोषितः सुतः॥
यत्करोति घनच्छायः पादपः पथिरोपितः। स दानमंत्री स भवति सदा [illegible]ं प्रयच्छति॥ स दा यज्ञं स यजेतैः
यो रोपयति पादपान्॥ छायां नयन्ति फलवृक्षाच्छायाद्यान्यादपान्यथिरोपितान्॥ छिंदंति ये नरा मूढास्ते यांति नरयं
चिरं। न पश्यंति यमं वैश्य तुलसीवनरोपनात्॥ सर्वपापहरं वैश्य कामदं तुलसीवनं। तुलसीकाननं वैश्य
गृहे यस्मिंस्तु तिष्ठति तद्गृहं तीर्थभूतं हि न यांति यमकिंकराः॥ तावद्वर्षसहस्राणि यावज्जीवदलानि च ॥१५॥
वसंति देवलोके ते तुलसीं रोपयंति ये॥ तुलसीगंधमाघ्राय पितरस्तुष्टमानसाः। प्रयांति गरुडारूढास्तत् ॥राम॰॥

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वदंवक्रपाणिना॥ दर्शनं नर्मदायास्तु गंगास्नानं विशांवरं। तुलशीदलसंस्पर्शः सममेतत्त्रयं स्मृतं॥ रोप
णात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणां। तुलशी दहते पापं वाङ्मनःकायसंचितं॥ पक्षे पक्षे च संप्राप्ते द्वादश्यां
वैश्यसत्तमः। ब्रह्मादयोपि कुर्वंति तुलशीवनमुत्तमं॥ मणिकांचनपुष्पाणि तथा मुक्तामयानि च। तुलपः
त्रमात्रस्य कलां नार्हंति षोडशीम्॥ आम्रारोपसहस्रेण पिप्पलानां शतेन च। यत्फलं हि तदेकेन तुलशी
विटपेन तु॥ विष्णुपूजनसंसक्तस्तुलशीं यस्तु रोपयेत्। युगायुतदशैकेकं रोपको रमते दिवि॥ तुलशी
मंजरीभिर्यः कुर्याद्धरिहरार्चनं। न स गर्भगृहं याति मुक्तिभागी भवेन्नरः॥ पुष्करादीनि तीर्थानि गंगाः
द्याः सरितस्तथा। वासुदेवादयो देवाः वसंति तुलशीदले॥ आरोप्य तुलशीं वैश्य संपूज्य च दलैर्हरिं व
संति मोदमानास्तु यत्र देवश्चतुर्भुजः॥ एककालं द्विकालं वा त्रिकालं वापि यो नरः। समर्चयंति भूतेः
शं लिंगैरेवासमुद्भवे॥ स्फाटिके रललिंगे वा पार्थिवे वा स्वयंभुवि। स्थापिते वा क्वचिद्वैश्य तीर्थे तीर्थे गि
रौ वने॥ नमः शिवाय मंत्रेण कुर्वंतस्तज्जपं सदा। प्रावंति यमलोकस्य कथामपि न ते जनाः॥ शिवमंत्रजाप्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भा॰म॰
॥१६॥

भावेन शिवभक्ताः शिवेरताः। मोदंते शिवलोके तु यावदिंद्राश्चतुर्दश॥ प्रसंगेनापि मोहेन दंभेनापि हि यो भक्त
सेवंते ये महादेवं नते पश्यंति भास्करीं॥ शिवार्चनसमं पुण्यं सर्वपापप्रणाशनं। सर्वैश्वर्यप्रदं वैश्य नास्ति किंचि
ज्जगत्त्रये॥ शिवभक्तिप्रकुर्वाणो ये द्विषंति जनार्दनं। ते यांति निरयं यावत्तावत्कालमुदाहृतः॥ द्रव्यमन्नं
फलं तोयं शिवस्वं न स्पृशेत्क्वचित्। निर्माल्यं नैव संलंघेत्कूपे सर्वं च निक्षिपेत्॥ मक्षिकापादमात्रं यः
शिवस्वमुपजीवति। मोहाद्धि भात्स पच्यते कल्पांते नरके नरः॥ तल्लोके काष्ठैश्च पाषाणैर्यः सृजंति शिवा
लयं। मोदंते सहस्रकं ते नराः शिवसंनिधौ॥ ब्रह्मविष्णुमहेशानां प्रासादमठमेव वा। कृत्वा तु सुचिरं
कालं विष्णुलोके वसंति ते॥ ये धर्ममठगोशालाः पथि विश्राममंदिरं। यतीनां सदनं वैश्य दीनानां च
कुटीरकं॥ ब्रह्मशालां च विपुलां ब्राह्मणस्य च मंदिरं। दत्वा यांति विशांश्रेष्ठ इंद्रस्य सदनं नराः॥ जी:
र्णोद्धारे वै तेषां तत्फलं द्विगुणं भवेत्। तान्भक्त्वान्यत्र यः कुर्यात्स गच्छेन्निरयं महत्॥ देवविप्रयतीनां च ॥१६॥
मठे लोभाद्विमोहितः। मठाद्यपत्यं चयः कुर्यात्स सर्वधर्मबहिष्कृतः॥ पत्रं पुष्पं फलं तोयं द्रव्यमन्नं मठस्य चार्थे ॥राम:॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऽन्नाति सपतेद्घोरान्नरकानेकविंशति॥ यस्मिन्देन्नरकं नेतुमसमुन्नपपुत्रवांधवां तं देवेश्वपतिं कुर्यात्क्रो
धवैशाललेरोगभुजा॥ सुभोज्यं मठिनामन्नं भुक्त्वा वांछाय नंजरेत॥ स्पृष्ट्वा मठपतिं वैश्यस्य वासाजलमाविशे
त॥ ब्रह्मविष्णुमहेशानां पूजार्थं पुष्पवाटिकां॥ आरोपयंति ये वैश्य देवलोके वसंति ते॥ ये सदापितृदेवार्थं प्री
णयंत्यतिथीन्सदा॥ प्राजापत्यं हि ते यांति लोकं सर्वोत्तमोत्तमं॥ मूर्खो वा पंडितो वापि श्रोत्रियः पतितोपि
वा॥ ब्रह्मतुल्योतिथिर्वैश्य मध्याह्ने यः समागतः॥ पथिश्रांताय विप्राय संतप्ताय क्षुधिताय च॥ प्रयच्छत्यंन
पानीयं तेनाके चिरवासिनः॥ प्राप्ते सुद्दष्टपूर्वोप्य भोक्तुकामः क्षुधातुरः॥ यज्ञहेतुं प्रिमा यांति ब्रह्मलो
के वसंति ते॥ अतिथिर्विमुखो यस्य न याति गृहमागतः॥ मध्याह्ने वैश्यसमये स न याति यमालयं॥ नाति
नास्ति वचः कृत्वा आशां त्यक्त्वा अतिथिर्व्रजेत्॥ आजन्मसंचितं पुण्यं गृह्णाति गृहमेधिनः॥ नास्त्यातिथिः स
मो बंधुर्नास्त्यातिथिः समं धनं॥ नास्त्यातिथिः स धर्मो नास्त्यातिथिः समो हितः॥ आतिथ्यस्य प्रभावेन राजाः
नो मुनयः स्तथा॥ ब्रह्मलोकं गता आपि न च्यवंते विशांवरः॥ मध्ये जन्मगृहस्थो पित्र मादादाकथंचन॥ भोज

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi 8

मा॰म॰
॥१७॥

यत्र तिथिन्नं नैव पश्यति सोऽन्तकं। तदा प्रभृति मानेन भुंक्ते पीयूषमन्नदः। याति स्वर्गं ततो वैश्य उत्तरांश्च कुरू
न्यतः। ततः श्रीमान्भारते वर्षे राजा भवति धार्मिकः। अन्नदो दीमाश्च पृथिवीं देदवीणां वंशतां। सर्वेषामेव भूतानामन्ने प्राणा
प्रतिष्ठिताः। तेनान्नदो विशांश्रेष्ठ प्राणदाता स्मृतो बुधैः। पाठके वस्वनो देवो राजानं केशरिध्वजं। एवं तं स्वर्गलोकांते
कासरोपेन विशांवर। ददस्वान्नं ददस्वान्नं ददस्वान्नं नराधिपः। कर्मभूमौ गतो भूयो यदि त्वं स्वर्गमिच्छसि। इत्युक्त्वा वि
भवाद्वैश्यासाक्षाद्गम भूरवा दपि। अन्नवत्समं दानमतो नास्ति मयोदितं। पानीयं प्रदद्ग्रीष्मे हेमंते च तपे धनं।
अन्नं च सर्वदा दत्वा न याम्यं याति यातनां। ज्ञाताज्ञाते पापे भुंजे भवमहत्सु वा। षण्मासं च मासे भु प्रायश्चित्तं
तु यश्चरेत्। निःकल्मषो नरो वैश्य सकृतां तं न पश्यति। प्रायश्चित्तमकृत्वैहं नरो भवति नारकी। प्रायश्चित्तं चरेः
यत्तु वाक्मनःकायकर्मजं। स प्राप्नोति शुभांल्लोकान्देवगंधर्वसेवितान्। नित्यं जपं तिरो वैश्य गायत्रीं वेदमं
तरं। अन्यद्वा वैदिकं जाप्यं न ते लिप्यंति पातकैः। वेदाभ्यासरता नित्यं सायं प्रातर्हुताशने। ये जुह्वति द्विजा वै
श्य ते लभंतेऽक्षयां गतिं। नित्यं ब्रह्मसमाचारो नित्यं तीर्थोपसेवकः। नित्यं जितेंद्रियः सत्यं यमं रौद्रं न पश्यति। ॥१४॥
परान्नं परयाकं च नित्यं धर्मरतस्त्यजेत्। नरकं दारुणां भुक्त्वा परान्ने च मतिं त्यजेत्। याम्यं हि यातनादुःखं नित्य ॥रामः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्नायीनयश्च तिा नित्यस्नानेन पूयंते अपि पापकृतो जनाः॥ प्रातःस्नानं हरेद्दैश्यस वाह्याभ्यंतरं मलं॥ प्राः
तःस्नानेन निष्पापो नरो न निरयं व्रजेत्॥ स्नानं विना तु यो भुंक्ते मलाशी स सदा नरः॥ अस्नायि चिनोऽभुंक्ते स्तः
स्य विमुखाःपि तु देवताः॥ स्नानहीनो नरः पापः स्नानहीनोऽशुचिस्तथा स्नानहीनो नरोऽभुक्त्वा पुल्कसादिषु
जायते॥ ये नराः श्रोतसि स्नानमाचरंतीह पर्वणि॥ तेनैव दुर्गतिं यांति न जायंते कुयोनिषु॥ दुःस्वप्नं दुष्टचिंतं
च वंध्या भवति सर्वदा प्रातःस्नानविशुद्धानां पुरुषाणां विशांवरं॥ तिलांश्च तिलपात्रं च तिलपद्मं यथाः
विधिः॥ दत्वा प्रेतपतेर्भूमिं न व्रजंति नराः क्वचित्॥ पृथिवीं कांचनं गां च महादानानि षोडश॥ दत्वानन्तु निव
र्तंते स्वर्गलोकाद्धि कुंडलः॥ पूर्णिमासु तिथिषु पापात्र व्यतीपाते च संक्रमे॥ स्नात्वा दत्वा च यः किंचित्तैव मज्जति दु
र्गतिं॥ नैवाक्रमंति दातारो दारुणा रौरवं पथः॥ इह लोके न जायंते कुले धनविवर्जिते॥ सत्यवादी सदा धर्मी
नी प्रियवादी वयो नरः॥ अक्रोधनः क्षमाचारी नातिवाग्य नसूयकः॥ सदा दाक्षिण्यसंपन्नः सदा भूतदयान्वितः
गोप्ता च परधर्माणां वक्ता परगुणस्य च॥ परस्वं न तृणमात्रं तु मनसापि न यो हरेत्तान यशंति विशांपते ये ए ः
ते नरका यातनां॥ परापवादी पापिष्ठः पापेभ्योऽपि स तं मम॥ पच्यते नरके तावद्यावदाभूतसंप्लवः॥ वक्ता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परुषवाक्यानां मंतव्यो नरकागतः॥ संदेहो न विशाखेऽत्र पुनर्यास्यति दुर्गतिं॥ न तीर्थैर्न तपोभिश्च कृतघ्न
स्यास्ति निष्कृतिः॥ सहते यातनां घोरां स नरो नरके चिरं॥ पृथिव्यां यानि तीर्थानि तेषु मज्जति यो नरः॥ जि
तेंद्रियो जिताहारो न स याति यमालयं॥ न तीर्थे पातकं कुर्यात्त्यजेत्तीर्थोपजीवनं॥ तीर्थे प्रतिग्रहस्त्याज्यः सर्व
ज्यो धर्मस्य विक्रयः॥ दुर्जरं पातकं तीर्थे दुर्जरश्च प्रतिग्रहः॥ तीर्थे तु दुर्जरं सर्वं एतत्कृत्वा नरकं व्रजेत्॥
सकृद्गंगांभसि स्नात्वा पूतो गांगेन वारिणा॥ नरो न निरयं याति अपि पापस्य राशिकृत्॥ व्रतदानतपोयः
ज्ञाः पवित्राणीतराणि च। गंगाविंदुभिषिक्तस्य न समा इति नः श्रुतं॥ अन्यतीर्थसमा गंगा यो ब्रवीति न
राधमां स याति रौरवे वैश्य नरकं दारुणं महत्॥ धर्मद्रवमपां बीजं वैकुंठचरणाच्युतं॥ धृतं मूर्ध्नि महे
शेन यद्गांगं निर्मलं जलं॥ यद्दृष्ट्वैव न संदेहो निर्गुणब्रह्मकृते परं॥ तेन किं समतां गच्छेदपि ब्रह्मांडगोलके॥ ॥१८॥
गंगेति नामग्रहणाद्योजनानां शतैरपि॥ नरो न निरयं याति किं तया सदृशं भवेत्॥ नान्येन दत्ता नेसग्रः कि ॥राम:॥
यानरकदायिनी॥ गांगे अंभसि प्रयत्नेन स्नातव्यं तेन मानवैः॥ प्रतिग्रहनिवृत्तो यः प्रतिग्रहक्षमोपि सन्॥ सदि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जोद्योतते वैश्य तारारूपा स्थिरं दिवि॥ गाः प्रकुर्वन्ति ये पंकादभ्युद्धरन्ति रोगिणीं। म्रियंते गोमये ये च तेसुर्नभ
सि तारकाः॥ यमलोकं न पश्यंति ब्राह्मणा यामरता नराः॥ अपि दुष्कृतकर्माणः सौरे वहन्ति किल्विषा॥ दिवसे दि
वसे वैश्य ब्राह्मणा यामास्तु षोडशः॥ अपि कृण्वन्त मासान्नूनं त्यहरहः कृताः॥ न यांसि यान्नीतप्पंते षु तानि नियः
माप्यये। गोसहस्रप्रदानं च ब्राह्मणायामाप्य तत्समाः॥ अपि विंदुं यः कुशाग्रेण मासे मासे पिबेन्नरः॥ संवत्सरसतं
साग्रं ब्राह्मणा यामास्तु तत्समाः॥ पातके तु महद्यच्च तथा क्षुद्रोपपातकं। प्राणायामैः क्षणात्सर्वं भस्मसात्कुरु विशां
वरः॥ मातृवत्परदारान्ये ये स पश्यंति नरोत्तमाः। ते नयांति विशांश्रेष्ठ कदाचिद्यमयातनां॥ मनसापि परे
षां यः कलत्राणि न सेवते। स हि लोकद्वये देवतेन वैश्य धराधृता॥ तस्माद्धर्मान्वितैस्त्याज्यं परदारोपसेवनं
नयंति परदारास्तु नरकान्येकविंशति॥ लोभे न जायते येषां परद्रव्येषु मानसं। ते यांति देवलोकं हि नया
न्यं वैश्यसत्तम॥ सत्यं क्रोधनिदानेषु यः क्रोधे नैव जायते। जितः स्वर्गस्समं तव्यः पुरुषोऽक्रोधनो भुवि॥ मा
तरं पितरं यस्तु आराधयति देववत्। संप्राप्ते वांतकाले च न स याति यमालयं॥ पितृराधिकामावे न येऽ
र्चयंति गुरुं नराः। भवंत्यतिथयो लोके वल्लभास्ते विशांवरः॥ इह देवताः स्त्रियो धन्याः शीलस्य परिरक्षणात्। श्री

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लभंगेन नारीणां सम्यग्लोकत्रूपकारणाः॥ शीलं रक्षन्ति यो धन्याः कुषसंगविसर्जनात्॥ शीलेन परमः स्वर्गः स्त्री
णां वैश्य न संशयः॥ अडस्य पाकयज्ञेन निषिद्धाचरणेन च॥ स्य गतिं विहिता वैश्य न तस्य नारकी गतिः॥ वि
चारयंति ये शास्त्रं वेदाभ्यासरता नराः॥ पुराणं संहितां ये च श्रावयंति पठंति च॥ व्याकुर्वंति स्मृतिं ये च ये
धर्मप्रतिबोधकाः॥ वेदांतेषु निष्णाये तेरियं जगती धृता॥ तत्तदभ्यासमाहात्म्यैः सर्वे ते हतकिल्बिषाः
गच्छंति ब्रह्मणो लोकं यत्र मोहो न विद्यते॥ ज्ञानमज्ञाय यो दद्यात् देदशास्त्राण्यवं॥ अपि देवास्तमर्चंति भव
८ यमदूतड॥ बंधविदारकं॥ अयं तामसदुतं वै तेन मत्र सत्वं वैश्य मत्तमा संमतं धर्मराजेन सर्वलोकामृतप्रदं॥ न यमं य
मलोकं च न दूतान्घोरदर्शनान्॥ पश्यंति वैष्णवा नूनं सत्यं सत्यं यमोदितं॥ ब्राह्मणाऽस्मान्यम ना आतास्याद
रं च नः पुनः॥ भवन्ति वैष्णवा यत्या ज्याननते स्तुर्मसगोचराः॥ ये स्मरंति सकृद्भूताः प्रसंगे नापि केशवं ते वि
ध्वस्ताखिलाघौघा यांति विष्णोः परं पदं॥ दुराचारोपि दुःशीलः सदा पापरतोपि वा॥ भवन्ति सर्वदा न्याः
जो विष्णुं नेमं भजते नरः॥ वैष्णवा यक्षुः हे भूंक्ते ये मां वैष्णवसंगतिः॥ तेषि वः परिहार्याः सुत तत्संगहतकि ॥१९॥
ल्बिषाः॥ इति वैश्य पात्र तास्ता स्मान्देवो दंडस्य धारकः॥ स्तुतो न वैष्णवा यांति राजधानीं यमस्य तु॥ विष्णु ॥राम:॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भक्तिं विना नृणां पापिष्ठानां विशां वर ॥ उपायो नास्ति नास्त्यन्यः संतर्तुं नरकांबुधिं ॥ श्वपाकमुत्तनश्येत
लोके विप्रस्तु वै भवेः ॥ वैष्णवो वर्णबाह्योपि पुनाति भुवनत्रयं ॥ नरके ये चिरं मग्नाः पूर्वजा ये कुलद्वये ।
ते देवयांति ते स्वर्गं यदा वैतिष्ठतो हरिं ॥ विष्णुभक्तास्त्वये दासमे वैष्णवान्नभुजंत्ये ये पि कुत्संजां वै
शुगतिं यांति निराकुलाः ॥ प्राशयेद्वैष्णवः स्यान्नं प्रयत्नेन विचक्षणाः । सर्वपापविशुद्ध्यर्थं तदभावे ज
लं पिबेत् ॥ गोविंदेति जपन्मंत्रं कुत्र चिन्म्रियते यदि । स नरो न यमं वेश्यतं च नेक्षामहे वयं ॥ सांगं
समुद्रं सन्यासं सऋषिच्छंदं दैवतं । सदीक्षाविधिसंयन्मंत्रं समंत्रं द्वादशाक्षरं ॥ अष्टाक्षरं च मंत्रेशं
ये जपंति नरोत्तमाः । तान्दृष्ट्वा ब्रह्महा शुद्ध्येत् ये पानाः वैष्णवास्त्वयं ॥ शांखिनश्चक्रिणो भक्त्या तुलापुः
र्वनमालिनः । वसंति वैष्णवे लोके विष्णुरूपेण ते नराः ॥ हृदि सूर्ये जले वाग्नौ प्रतिमास्थंडिलेषु चाम
भ्यर्च्य हरिं यांति नरास्ते वैष्णवं पदं ॥ स्वभावात्सर्वदा पापज्योवाछदेवोपरुभक्तिभिः । शालग्रामशिलाच
क्रे वज्रकीटविनिर्मिते ॥ साधिष्ठानं वनतद्विप्रोः सर्वपापप्रणाशनं । सर्वपुण्यप्रदं चैव सर्वकामः
विमुक्तिदं ॥ यः पूजयेद्धरिं चक्रे शालग्रामसमुद्भवे । राजसूयसहस्रेण तेनेष्टं प्रतिवासरं ॥ यदाम

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰म॰ नंतिवेदानाव्रतानि वागणि मखुतं न तत्समासाद्भवेन्नृणां शालग्रामशिलार्चनात् ॥ महत्कोपि स्थितो वह्नि
॥२०॥ र्मथ्यमाने प्रकाशते। तथा तथा हरिर्व्यापि शालग्रामे प्रकाशते ॥ अपि पापसमाचाराः कर्मण्यनधिकारिः
णः शालग्रामार्चका वैष्णवा नैव यांति यमालयं ॥ न तथा रमते यक्ष्म्यां न तथा स्वपुरे हरिः। शालग्रामशिलि
वक्रे यथा शौरमते सदा ॥ अग्निहोत्रं हुतं तेन दत्ता पृथ्वी समागराः। तेनार्च्चितो हरिश्चक्रे शालग्रामशिः
लोद्भवो। यः करोति मनुजः शालग्रामशिलार्चनं। पापानि विलयं यांति तमः सूर्योदये तथा ॥ शिलि
ताद्वादशभौ वैष्णव शालग्रामशिलोद्भवाः। विधिवत् पूजिता येन तस्य पुण्यं वदामि ते ॥ कोटिद्वादशलिंगैः
लैः पूजितैः स्वर्णपंकजैः। न त्स्या द्वादशकल्पदिनेनैकेन तद्भवेत् ॥ सः पुनः पूजयेद्भक्तः शालग्राम
शिलां सदा। उषित्वा सहते स्त्रोकेव कावतीहृजायते ॥ कामैः क्रोधैः प्रलोभैश्च व्याप्तो योहि नराधमः। सो
पियाति हरेः क्षेत्रं कं शालग्रामशिलार्चनात् ॥ यः पूजयति गोविंदं शालग्रामे सदा नरः। आभूतसंप्ल ॥२०॥
वं यावन्न सप्रच्यवते दिवः ॥ विना तीर्थैर्विना दानैर्विना यज्ञैर्विना मतिं। मुक्तिं याति नरो वैष्णव शालग्रा ॥राम:॥
मशिलार्चनात् ॥ नरकं गर्भवासं च तिर्यक्त्वं कृमियोनितां। न याति वैष्णपापोपि शालग्रामेऽच्युतार्चकः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कः॥ दीक्षाविधानमंत्रज्ञश्चक्रे यावलिमा हरेत्॥ स याति वैष्णवं धामं सत्यं सत्यं मयोदितं॥ स्नातः सर्वतीर्थेषु स
र्वयज्ञेषु दीक्षितः॥ शालग्रामशिलातोयैर्योभिषेकं समाचरेत्॥ गंगागोदावरी रेवा नद्यो मुक्तिप्रदास्तु याः॥ नवसं
तिमती तीर्थास्ताः शालग्रामशिलाजले॥ नैवेद्यैर्विविधैः पुष्पैर्धूपैर्दीपैर्विलेपनैः॥ गीतवाद्यादिस्तोत्राद्यैः शाल
ग्रामशिलार्चनं॥ कुरुते मानवो यस्तु कलौ भक्तिपरायणः॥ कल्पकोटिसहस्राणि रमते संनिधौ हरेः॥ यं हि लि
गैः कोटिभिर्दृष्टैर्यत्फलं पूजितैस्तु तैः॥ शालग्रामशिलायां तु एकेनापीह तत्फलं॥ सकृदभ्यर्चिते लिंगे शाल
ग्रामशिलोद्भवे॥ मुक्तिं प्रयाति मनुजो ज्ञानेन दंभेन वर्जितः॥ शालग्रामशिलारूपी यत्र तिष्ठति केशवः॥ त
त्र देवासुरा यक्षाः भुवनानि चतुर्दश॥ शालग्रामशिलाग्रे हि यः श्राद्धं कुरुते नरः॥ पितरस्तस्य तिष्ठंति तृप्ताः
कल्पशतं दिवि॥ ये पिबंति नरा नित्यं शालग्रामशिलाजलं॥ पंचगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनं॥ को
टितीर्थसहस्रैस्तु सेवितैः किं प्रयोजनं॥ तोयं यदि पिबेत्पुण्यं शालग्रामशिलागतं॥ शालग्रामशिला यत्र तत
तीर्थं योजनत्रयं॥ तत्र दानं च होमश्च सर्वं कोटिगुणं भवेत्॥ शालग्रामशिलातोयं यः पिबेद्बिंदुना समं॥ मा
तृस्तन्यं पुनर्नैव स पिबेन्मुक्तिभाग्नरः॥ शालग्रामसमीपे तु क्रोशमात्रं समंततः॥ कीटकोपि मृतो याति वैकुं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥२१॥ भवनन्नरः॥ शालग्रामशिलाचक्रं दद्याद्धि दानमुत्तमं। भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं॥
शालग्रामशिलायांतु मूल्यमुत्पादयेन्नरः॥ विक्रेता चानुमंता च यः परीक्षानुमोदयेत्॥ सर्वे ते नरकं
यांति यावदाहूतसंप्लवं॥ अतस्तं वर्जयेद्विष्णो चक्रस्य च क्रविक्रयं॥ वक्तुनो केन किं वैश्यकर्त्तव्यं पाप
भीरुणा स्मरणं वासुदेवस्य सर्वपापहरं परं॥ तपस्तप्त्वा नरो घोरी समर्थो विद्यते द्विजः। यत्फलं स
मवाप्नोति तत्स्मृत्वा गरुडध्वजं॥ कृत्वापि बहुशः पापं नरो मोहसमन्वितः। न याति नरकं नत्वा
सर्वपापहरं हरिं॥ पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च। तानि सर्वाण्यवाप्नोति विष्णोर्नु
मानुकीर्त्तनात्॥ देवं शार्ङ्गधरं विष्णुं ये प्रपन्नाः परायणाः। न तेषां यमलोकं च न ते हि नरकौकसः॥ वै
ष्णवः पुरुषो वै ह्य शिवनिंदां करोति यः। न विंदेद्वैष्णवं लोकं स याति नरकं ध्रुवं॥ उपोष्यैकादशीमेकां प्र
संगेनापि मानवः। न याति यातनां यामीमिति लोमशतः श्रुतं॥ नेदृशं पावनं किंचित्त्रिषु लोकेषु विद्यते ॥२१॥
श्रमयं पद्मनाभस्य दिनं पातकनाशनं॥ तावत्पापानि देहेऽस्मिन्वसंति हि विशांवरं। यावन्नोपवसेज्जंतुः प ॥रामः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्नानामदिनंशुभं॥ अश्वमेधसहस्राणि राजसूयशतानि च। एकादश्युपवासस्य कलां नार्हंति षोडशीं॥
एकादश्यांद्रियैः पापं यत्कृतं वैश्य मानवैः। एकादश्युपवासेन तत्सर्वं विलयं व्रजेत्॥ एकादशीसमं किं
चित्पापं लोके न विद्यते। व्याजेनापि कृता यैस्तु न वशं याति भास्करे॥ स्वर्गमोक्षप्रदा ह्येषा शरीरारोग्यदायि
नी। सुकलत्रप्रदा ह्येषा जीवत्पुत्रप्रदायिनी॥ न गंगा न गया वैश्य न काशी न च पुष्करं। न चापि वैष्णवं क्षे
त्रं तुल्यं हरिदिनस्य तु॥ यमुना चंद्रभागा च तुल्या दिनेन नो हरेः। अनायासेन येनात्र प्राप्यते वैष्णवं पदं॥ रात्रौ
जागरणं कृत्वा समुपोष्य हरेर्दिनं। दश वै पैत्रके पक्षे मात्रके दश पूर्वजान्॥ प्रियायाः दश ये वैश्य नातुद्धर
ति निश्चितां। द्वंद्वसर्गविनिर्मुक्ताः नागारीकृतकेतनाः॥ स्रग्विणः पीतवस्त्राश्च प्रयाति हरिमंदिरं। बालत्वे
यौवनत्वे वा वृद्धत्वे वा विशांवर॥ उपोष्यैकादशीं नूनं नैति पापोतिदुर्गतिं। उपोष्य वा त्रिरात्राणि कृत्वा वाली
र्थमज्जनं। दत्वा हेमतिलान् गाश्च वैश्य स्वर्याति मानवः। तीर्थेस्नाति नरो वैश्य न दत्तं कांचनं वचैः॥ नैवत
प्तं तपं किंचित्तेसुः सर्वे बुडुःखिताः॥ संक्षिप्य वक्ष्यते धर्मं नरकस्य निवारकं॥ शृणोहः सर्वभूतेषु वाङ्मनः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कायकर्मभिः॥ इंद्रियाणां नरोधश्च दानं च हरिसेवनं॥ वर्णाश्रमक्रियाणां च विधितः पालनं सदा॥ स्वर्गार्थीः
सर्वदा वेश्पते पोशानं च कीर्त्तयेत्॥ यथाशक्तिः सदा दद्यात् ब्राह्मणेभ्यो हितकाम्यया॥ उपानद्वस्त्रछत्रादि अन्न
मूलं फलं जलं॥ एवं व्यादिवसं कुर्याद्धरिद्रेणापि वैश्यकाः॥ इह लोके परे लोके नादन्नमुपतिष्ठते॥ यातना
रौ नैव पश्यंति तां तां हि यमयातनां॥ दीर्घायुश्शोधना व्यास्मिन्भवंतीह जनः जनः॥ किमत्र बहुनोक्तेन यथा
त्यधर्मेन दुर्गतिं॥ आरोहति दिवं धर्मे नरः सर्वत्र सर्वदा॥ तेनुवाल त्वमारभ्यक नैवोधर्मसंग्रहः॥ इ
ति ते कथितं सर्वं किमन्यच्छ्रोतुमिच्छसि॥ विकुंडल उवाच॥ श्रुत्वा तव वचः सौम्य प्रसन्नं मम मानसं॥ गं
गेव पापहा सत्यः पापहारी सतां वचः॥ उपकर्तुं प्रियं वक्तुं गुणो नैसर्गिकः सतां॥ सीतांशुः क्रियते केन शी
तरश्मि न मंडलं॥ देवदूत ततो ब्रूहि कारुण्यान्मम पृच्छतः॥ नरकान्निर्गतिः सख्यो भ्रातुर्मे जायते कथं॥ द
तोत्रेय उवाच॥ इति तस्य वचः श्रुत्वा देवदूतो जगाद ह॥ ज्ञानं दृष्ट्वा क्षणं ध्यात्वा तन्मैत्रीरज्जुबंधनं॥ गतेः ॥२४॥
वैश्या ष्टमे जन्मे त्वयाजन्मनि संचितं॥ तस्मात्रे दीयतां शीघ्रं स्वर्गतिं तस्य इच्छसि॥ विकुंडल उवाच॥ किं ॥रामः॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्पुण्यं कथजातं किं जन्माहं पुराभवं । तत्सर्वं कथयतां द्भुतेन ततो दास्यामि सत्वरं ॥ दूत उवाच ॥ शृणु वै
श्य प्रवक्ष्यामि यत्पुण्यं तव हेतुकं । पुरा मधुवने पुण्ये ऋषिराशीद्ध शाकलिः ॥ तपोध्ययनसंपन्नः
स्तेजसा ब्रह्मणः समः ॥ जज्ञिरे तस्य रेवत्यां नव पुत्रा ग्रहा इव ॥ ध्रुवः शशी क्रतुस्तारो ज्योतिष्मानत्रः
पंचमः ॥ अग्निहोत्रप्रिया ह्येते गृहधर्मे पुरेमिरे ॥ निर्मोहो जितमायाश्च ज्ञानरिशो गुणातिगः ॥ एतेषु
हविरक्तास्तु चत्वारो द्विजसत्तमाः ॥ चतुर्थाश्रममापन्नाः सर्वकर्मसु निस्पृहाः ॥ ग्रामे कनिष्ठिनः सेवंति निःसं
गानि ह्यरिष्टहा ॥ निःशिष्यानि पवीताश्च समलोष्टाश्मकांचनाः ॥ येन केन चिदाछन्ना येन केन चिदाशिताः ॥ सं
यंत्राहभ्याय नित्यं ब्रह्मध्यानपरायणाः ॥ जितनिद्रा जिताहारा वातशीतसहिष्णवः ॥ पश्यंतो विष्णुरूपेण
जगत्सर्वं चराचरं । चरंति लीलया पृथ्वीं नेतोयं मौनमाश्रिताः ॥ न कुर्वंति क्रिया काचिद् ज्ञानमात्रं हि यो
गिनः ॥ दत्त ज्ञानाश्रुतं दिष्टो शिष्याचारविशारदाः ॥ एवं तेन च विप्रस्य पूर्वजन्मनि तिष्ठता ॥ मध्यदेशेषु
रम्येषु पुत्रदारकुटुंबिना ॥ गेहं तव समासाद्य मध्याह्ने क्षुत्पिपासिताः ॥ विप्रदेवोत्तरे काले त्वया दृष्टा गृहागताः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गणेः॥ सगद्गदं साश्रुनेत्रं सहस्रं वत्सलस्वं भुमं दंडवत्प्रणिपातेन वक्तुमानपुरःसरं॥ प्रणम्य वरणौ स्पृष्ट्वा
हैत्वोपाणिपुटांजलिं न दाभिनंदिताः सर्वे त्वयास्तूनेतयगिरा॥ अद्य मे सफलं जन्मजीवितं सफलं तथा
श्रेयविश्रुपसत्नोमेसनाथास्म्यद्य पावनः॥ धन्योस्मि मे गृहं धन्यं धन्या मे च कुटुंबिनी॥ मम माद्य पितरो
धन्याः धन्या गावः द्रुताधनं॥ यद्दृष्टो भवतां पादो तापत्रयहरो मया॥ भवतां दर्शनं यस्मा(द्)न्यस्यैव हरेरि
व॥ एवं संपूज्य तेषां तु चरणक्षालनं त्वया॥ धृतं मूर्ध्नि विशांपते श्रद्धया परया तदा॥ यतिपादोदकं वै
श्यहं तिपापं पुराकृतं सप्तजन्मार्जितं सद्यः श्रद्धया परया धृतं॥ गंधपुष्पाक्षतैधूपैर्नीराजनपुरःसरं
संपूज्य संचितैरन्नैर्भोजिता यतयस्त्वया॥ हृष्टाः परमहंसास्ते विश्रांता मंदिरे निशि॥ ध्यायंतश्च परं ज्यो
तिर्यज्ज्योतिर्ज्योतिषां मतं॥ तेषामातिथ्यजं पुण्यं जातं ते यद्विशांवर। न तद्वक्तुं सहस्रेणावक्तुं शक्तो
म्यहं खलु॥ भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः॥ बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणजातयः॥ ब्र ॥२३॥
ह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः॥ कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः॥ अतएव हि यस्मास्ते ॥रामः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

र्यथातीर्थं भवेच्च माघजैः॥ दुःखौघसंतप्तमसत्त्वयातनां यामीं नये यांत्यपि पापकारिणः॥ ये माघमा
से वरतीर्थमज्जनं कुर्वंति चार्कोदित सूर्यमंडले॥ स्नात्वा हि माघे हरिमर्चयंति ये स्वर्गच्युता भूप
तयो भवंति ते॥ नराः सुरूपाः शुभगाः प्रियंवदा धर्मान्विता भूरि धनाः शीलायुषः॥ दीप्तेऽनले काष्ठचये
यथाहुतो भस्मावशेषो भवतीह तत्क्षणात्॥ स्नानेन माघस्य तथा विलीयते कृत्स्नोपपापोघमहाघसं
चयः॥ कायेन वाचा मनसा च पातकं ज्ञातं यदज्ञातमलं कृतं नरैः॥ स्नानं तु माघे वरतीर्थसंभवं सर्वं
दहेद्धि सुरिवाभ्रहृज्जातः॥ संपूज्यमानो वकुलेऽथ पार्थिव पमानदो वीह नृणां कदाचन॥ स्नानं १६
तु माघस्य यदि प्रसज्यते तद्दैवतत्संक्षयमेति निश्चितं॥ गंधर्वकन्याः पृथिवीश शापजं शं पूज्यमाः २८
ना हि फलं दुरत्ययं॥ स्नानादिमुक्ताः खलु माघमासजाद्यकात्तुशालो मशजातदद्भुतं॥ सूतसर्व ॥३४॥
च॥ श्रुत्वेतत्सार्थिनः प्रीत्या नत्वा तत्पादपंकजं॥ अद्भुयापरयान प्रस्तांप प्रद्धुपरो धसं॥ दिलीप ॥एमः॥
उवाच॥ भगवन्ब्रूहि कन्याभिः शापोऽलंपि कथं कृतः कस्यापत्यानि तासां च नामकी कीदृशं व

Jagannath Bhattarai Collection: Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पद्मपुराणेउत्तरखंडे वशिष्टदीलीपसंवादे तृतीयः॥१३॥ वशिष्ठउवाच॥ कथितं माघमाहात्म्यं दत्ता
त्रेयेन भाषितं। अधुना संप्रवक्ष्यामि माघस्य स्नानजं फलं॥ सर्वक्रतुवरिष्ठं च सर्वदानफलप्रदं। सर्व
व्रततपस्तुल्यं माघस्नानं परं तप॥ स्नानेन माघस्य दीलीप मानवाः पितॄन्दिवि स्थाप्य कुलद्वयस्याः
स्वर्गं प्रयांति स्वयमुज्वलामला वरैर्विमानैस्तु चिरैश्च कामगैः॥ ये मानवा पापकृतोपि सर्वदा सदद्
राचाररता विमार्गगाः। स्नात्वा हि माघे ऽहिरिव त्वचं भृशं मुंचंति ते पीह महाघसंचयं॥ सत्येन हीना
ः पितृमातृदूषिताश्च नाश्रमस्थाश्रमधर्मवर्जिताः॥ येदापि काले पि नराः सतां गतिं स्नानैः प्रयांत्य
त्र हि माघसंभवैः॥ प्राप्यैव तीर्थं प्रव माघमासजं स्नानं नराणाम तिदुर्लभं भुवि। तस्माद्यतो प्राप्तवि
दां गतिं वरां संप्राप्यते नात्र विचारणा मम॥ माघे तपो दानजपप्रसेवनं स्नानं हरेः पूजनमक्षयं नृ
प। तस्माद्यथाशक्ति नरैः प्रयत्नतः स्नात्वा प्रदेयं वसनाग्निकांचनं॥ माघेन्नदानाऽमृतपः कृतालये
हेमन्तः कृतातावलभिः समीपगाः। दीपाग्निवासांसि ददन्नरः सदा सूर्यस्य लोके वसति प्रभामये॥ य
ज्ञैः कृदानैः कृतपोभिरुज्वलैः भ्रव्रह्मचर्यैर्वरयोगसेवया। भ्रक्ता भवंती ह तथा न पापिनः स्नानैः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातं चिंतेति निषेधे हि सकलं भवशीलस्तु तं ॥ संत्यज्य राक्षसत्वं च पर्क्कृते देवके सेज्योतिर्मयो भूत्वा यथा तुरगे मा-
नाकं ॥ अतः धर्ममतं ततो दृष्ट्वा सुप्तं तु स राक्षसो ब्रुवीत ॥ राक्षस उवाच ॥ त्वत्कृपया तास दाम्भ यात्वं च कांचनमा-
लिनी ॥ भव प्रमुदिता नित्यं सर्वदा शिवमेनमास्तु ते ॥ त्वां वं जानकीरमस्तत्वं कैलाशे शिवसंनिधौ ॥ उमया त्वं डि-
तः प्रेमानन्दवान्नुवरवर्णिनी ॥ धर्मनिष्ठा तपोनिष्ठा माता नत्वं भव सर्वदा ॥ मास्तु लोभः शरीरे ते आपन्नार्ति
सदा हर ॥ इत्युक्त्वा तु प्रणम्याथ स तां कांचनमालिनीं ॥ जगाम राक्षसः स्वर्गं गंधर्वैः कुशलस्तुतः ॥ देवक-
न्यास्तदागत्य ववृषुः पुष्पवृष्टिभिः ॥ तस्याः कांचनमालिन्याः पार्श्वे हर्षसमाकुलाः ॥ ता मालिंग्य ततः प्रोचुः क-
न्यकाः सुप्रियं वचः ॥ कृते भद्रे त्वया चित्रं रक्षः सोऽपि विमोचनं ॥ दृष्ट्वास्य भयात् कश्चिद् दिशं त्यक्त्वा तस्मिन्नर्के
नतो ॥ अधुना निर्भयाः सर्वविचरामो यथासुखं ॥ इत्युक्त्वा तद्वने राजन् तासां कांचनमालिनी ॥ कृता
तेनैव दानेन कृतकृत्यमतीव च ॥ तं राक्षसं कांचनमालिनी तदा गंधर्वकन्या परिमोक्ष्य सत्वरं ॥
क्रीडन्त्य सखीभिः प्रययौ हिमालयं प्रीत्यान्वा स्मरन्ती परोपकारया ॥ संवादमेतं कन्यके रितं भक्त्याव-
रं यो त्र शृणोति मानवः ॥ नो बाध्यते जातु स दास राघवस्य धर्मे मतिस्तस्य शंभु जायते ॥ ८९ ॥ इति श्री

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एपजं फलं ॥ तेन दास्यामि ते मित्रसख्यः पापविनाशनं ॥ दत्तात्रेय उवाच ॥ निःपीड्य च ततो वासो जलं कृत्वा
करांबुजे ॥ ददौ सा माघयजं पुण्यं तस्मै ब्रह्मराक्षसे ॥ वशिष्ठ उवाच ॥ शृणु राजन्विचित्रं हि प्रभावं माघमा
सजं ॥ तदैव प्राप पुण्यं स विप्रत्वा राक्षसी तनू ॥ संभूतो देवताकारो जातो भास्कर विग्रह ॥ देवयानसमा
रूढो हर्षणोत्फुल्ललोचनः ॥ योतमानः सदा व्योम्नि भासयन्सुभया दिशः ॥ दिव्यरूपधरो रेजे द्वितीय इव
भास्करः ॥ ततो भिनंदयामास स तां कांचनमालिनीं ॥ मडवेनीरो देवः कर्मणा यः फलप्रदं ॥ तव स्नुप्रकृतं सर्वं
यत्र मे नास्ति निष्कृतिः ॥ इदानीं मयि कारुण्यं पात्रभीदानुग्रहं कुरु ॥ शिक्षां विधेहि मे देवि सर्वनीतिमयीं
शुभां ॥ सर्वधर्ममयीं नूनं न कुर्वे येन पातकं ॥ तां श्रुत्वा वचनं ज्ञातः पश्चात्याप्रमिलयं ॥ दत्तात्रेय उवाच
॥ एतन्निशम्य तेनोक्तं प्रियं धर्ममयं वचः ॥ प्रतिप्रीत्याब्रवीद्धर्मं राजन्कांचनमालिनी ॥ धर्मं भज स्वसत
तं त्यज भूतहिंसां सेवस्व साधुपुरुषान्जहि कामशत्रून् ॥ अन्यस्य दोषगुणकीर्तनमाशु हित्वा सन्यंव
सार्थय शिवं जय सर्वखानि ॥ देहेऽस्थिमांसरुधिरेहमतिं त्यज स्वजायासुतादिषु सदा ममतां विमुंच ॥
पश्यानिशं जगदिदं क्षणभंगनिष्ठं वैराग्यभावरसिको भव योगनिष्ठः ॥ प्रीत्या मया निगदितं न च धर्म

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰ म॰ ॥३०॥ नोमम ॥ तीर्थफलं तिकालेन स्याः संगस्सतां खलु ॥ अतः सत्संगतिः सृभ्रसर्वैराकांक्षते सदा ॥ प्रशं
संति महात्मानः सतां संगान्नृणां सुखं ॥ एतत्ते कथितं सर्वं स्वदुःखं हरता मया ॥ विरलः सज्जनः सृष्टस्त्वा
त्मा यत्र निवेद्यते ॥ जानास्यत्रोपि तत्त्वं हि किं विज्ञापयाम्यतः परं ॥ श्रुत्वा दुःखोदधेः पारं कथं यामीति चिंत
यो सज्जनानां समाप्नोति परेषामुपजीविनां ॥ क्षीरार्णवपयोधत्ते हंसाय च बकाय च ॥ रत्नाकरः किं कुरुते
सरस्तैर्विंध्याचलः किं करिभिः करोति ॥ श्रीखंडखंडैर्मलयाचलस्य परोपकाराय सतां विभूतयः ॥ इति तस्य
वचः श्रुत्वा कृपाई कृतमानसा ॥ धर्मदानेमतिं कृत्वाऽब्रवीत्कांचनमालिनी ॥ करिष्ये निष्कृतिं रक्ष इदानीं
खलु धर्मतः ॥ प्रतिज्ञां तु दृढां कृत्वा यतिष्ये तव मुक्तये ॥ बहवो हि कृता माघा वर्षे वर्षे यथाविधि ॥ अज्ञापूः
र्वं मया भद्र तुलक्षेत्रे सितासिते ॥ तेदशमिन संख्यां तो तस्य धर्मस्य राक्षसः ॥ गतो धर्मो हि कर्तव्यो इत्युच
विद्वोजनाः ॥ श्रोत्रे दानं प्रशंसंति मुनयो वेदवादिनः ॥ सागरे वर्षतो भद्र किं मेघस्य फलं भवेत् ॥ दत्ता म ॥३०॥
माघजं पुण्यं कृतमेकं सितासिते ॥ तेन ते स्वर्गते मोक्षो भविष्यति न संशयः ॥ श्रुत्वाभूत मया रक्षः स्वयं तत्र ॥राम:॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोमहृत्तित्रिर्मले॥ राज्ञां दुष्कृतिनां भीरोऽपडाणां च तथा विशां॥ वाराणस्यां कृतो घोरो मया दुष्टःप्रतिग्रहः
वेङ्कधावड्जवारं च निषिद्धः कृत्स्नितो वड्डः॥ चांडालस्यापि नित्यं त्वेको मयाभड्डेप्रतिग्रहे॥ [redacted]॥ अन्यच्चैव
तर्कं तन्त्रममाभ्यसूढ्वे तमः॥ तन्नास्ति दुष्कृतं कर्म मया यन्न कृतं प्रभो॥ श्रुण्वस्व श्रूयतां देवः क्षत्रस्य
वरवर्णिनि॥ श्रुविमुक्ते गंगा मात्रं यत्तदघमेरुतां वजेत॥ न धर्मस्तु मया किंचित्संचितस्तत्र जन्मनि॥ त
था ब्रह्म तिथे कालेमृतस्तत्रैव शोभने॥ श्रुविमुक्तप्रभावेन न चाहं नरकं गतः॥ श्रुविमुक्ते मृतः कश्चिन्न
रकं नैति किल्बिषी॥ श्रुविमुक्ते कृतं पापं वज्रलेपं भवेद्दृढं॥ वज्रलेपेन पापेन तेन मे जन्म राक्षसं॥ रौद्रं कु
रुतरं पापं संभूतं हिमवर्वते॥ द्विजौ तोग्रद्रयोनेः प्राकृत्रिः व्याघ्रोद्धिः सरीसृपः॥ एकवारमृत्युकस्तु वि
द्धराहस्ततःपरं॥ इदं तु दशमं जन्म राक्षसं जन्मभामिनि॥ अतीतानि सहस्राणि वर्षाणां यं वसप्रतिः
नास्ति मे निष्कृतिर्भद्रे स्येतस्माद्दुःखसागरात्॥ अगान्त्रियोजनं भुक्ष्मुनिर्ज्जं तु हि मया कृतं॥ श्रुनागसा
वभूतानां वड्डनां च क्षयःकृतः॥ कर्मणा तेन मे भुक्ष्मु दह्यते सततं मनः॥ त्वद्दर्शनं तु धास्मि कुंगतं शैत्यं मनः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰म॰ क्षणं विध्वंसितेयश्शुपं तीनिर्गतास्म्यहं॥ नरकार्णवसंपातनः तु गोंतकवह्निना॥ हृदयेकोणवव्याघ्रतर्द
॥२९॥ नातपमानया॥ मयागत्वा कृतं स्नानं माघमासे सितासिते। तस्य स्नानस्य माहात्म्यं शृणुष्व छिन्नि:
शाचरः॥ अहं तु पाक्षयोजातः सप्तविंशतिमिद्दिनैः॥ शेषैस्तैर्यदमुत्पुण्यं तेन देवत्वमागता॥
रममानात्केलाशेगिरिजायाः प्रियासखी॥ जातिस्मरा तथाजाता तस्यागमस्य भावतः॥ स्मृत्वा पुण्या
१२ फो॰ वन मा गमाहात्म्यं माघमासेव जाम्यहं॥ इति राक्षस यन्त्रं त्वयाविस्मितचेतसा॥ तन्मया कथितं सर्वं वि
लि नु थाव चित्रं प्रीतये तवा मत्प्रीतये चरित्रं त्वं त्वं ब्रूहि मम राक्षस॥ कर्मणा केन जातो सि विरूपो तिभयं
करः॥ रमश्रुरो दीर्घदंष्ट्रश्च कथा दो गिरिगह्वरे॥ राक्षस उवाच॥ इदं ददाति गच्छामि गृहं वचनंव
पृच्छति प्रीत्या हि सज्जनो भवेत नु सर्वं त्वचि स्थितं॥ त्वया संभावितो नूनं मन्ये हं वामलोचने मा
विनी निष्कृतिं सखः स्वस्यात्य करजन्मनि॥ श्रुतो वक्ष्यामि ते भद्रे दुष्कृतं यत्स्वयं कृतं निबोधसज्ज ॥२९॥
ने दुःखं यतः सर्वं सुखी भवेत्॥ शृणुष्व श्रीम्यहं काश्यपो वदान्यो वेदपारगः॥ जातः पुराद्विजश्रेष्ठः ॥राम:॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न जायते॥ ततो गुरोप्रबोधेन निर्गतः पद्मकुड्मलात्। दीनाननो विरूपस्तु व्रीडाकुंचितलोचनः॥ जग्राह च
रणौ विडौजसो गुरोस्तस्याग्रजन्मनः॥ त्राहि मां निर्दीप्तिं कृहि मां पापस्यास्य बृहस्पते॥ देवराजवचः श्रुत्वाऽब्रवीः
द्विप्रो बृहस्पतिः। प्रयागस्नानमात्रेण तत्क्षणाद्देवपातकात्॥ मुच्यते देवराज त्वं तत्र यामः सहैव ते। अ
थो गुरोधसा सार्द्धमागत्य बलमर्द्दनः॥ सस्नौ सितासिते तीर्थे सद्योमुक्तो ययौ स्वयं। अथ देवगुरुस्त
स्मै प्रसन्नस्तु वरं ददौ॥ श्रीरापापस्य ते शक्र मत्प्रसादेन सत्वरं। सहस्रं यच्च योनीनां सहस्रं स्याद्दृशो
तव॥ तदैव द्विजवाक्येन प्रभुमे शचीपतिः। लोचनानां सहस्रेण पंकजैरिव मानसं॥ व्यास उवा
च॥ अथ वृंदारकैः सर्वैः ऋषिभिश्चापि पूजितः। गंधर्वैस्तूयमानस्तु गतः शक्रोऽमरावतीं॥ इत्थं स
यो विपापो भूत्प्रयागे पाकशासनः। अपि त्वं याहि कल्याणि प्रयागं देवसेवितं॥ सद्यः पापविनाशाय
तथा स्वर्गोपपत्तये। इति तस्य वचः श्रुत्वा सेतिहासं सुमंगलं॥ तदैव संभ्रमापन्ना पादान्नत्वा द्विजस्य
तु। त्यक्त्वा बंधुजनं सर्वं दासदासीगृहं तथा॥ स्वकलान्विता यानं रक्षोविध्वंसा सानि वस्तुटं। विभूष्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा.म.
॥२८॥

राज्यारमापदां नियतं पदं । देहस्त्वं दुर्मदं शत्रुमसंतुष्टं सदाशिवं ॥ इत्थंवादिनि प्रकृत्रे वाल वेपमसः
मनि । आखंडलं विना भीरो देवलोको न शोभते ॥ तदा देवाः सगंधर्वाः लोकपालाः सकिन्नराः । यक्षाद्याः
सह समागम्य पप्रच्छुस्ते बृहस्पतिं ॥ भगवन्बलमिद्धं वो नैव जानीमहे वयं । क्व तिष्ठति गतः कुत्र
कुत्र वा मृगयामहे ॥ न भाकः शोभते तेन विना देवगणैः सह । गुरुपुत्रेण विना यद्वत्कुलक्ष्मीमकृ
शान्वितं ॥ उपायश्चिंत्यतां सद्यः स्वः इंद्रो को येन जायते । सनाथः स्वप्रियायुक्तो न विलंबात्प्रजायते ॥
इति तेषां वचः श्रुत्वा गुरुर्वचनमब्रवीत् । जानेहं स्वापराधेन लज्जया यत्र तिष्ठति ॥ रभसार स्वर्क
र्यस्य पुत्रो सम प्रवा फलं । नृणां नीतिपरित्यागाद्विपाकाः सुभयंकराः ॥ अहो राज्यमदैर्मत्तैः कृत्याः
कृत्यमचिंतयत् । कृतवान्निंद्यमानं हि पापं दृष्टिक्षयंकरं ॥ कुर्वंति बालिशा स्वात्र दैवोपहतबुद्ध ॥२८॥
यः । स्वपराधात्तथा जन्मस्यादिहाप्यत्र निष्फलं ॥ श्रुत्वा नात त्रगग्धमो यत्र शक्रः स तिष्ठति । इत्युक्ता ॥राम:॥
निर्गताः सर्वे बृहस्पतिपुरोगमाः ॥ दृष्ट्वा सरसि विस्तीर्णे [illegible]पंकजकाननं । तत्पुष्टं देवराजं तं प्रबोधाय

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्वरं वाक्यं याहि क्षेत्रं प्रजापतेः॥ तत्र गत्वा कृतस्नानं तेन पापक्षयस्तव। नाहमन्यत्तु पश्यामि यत्ते
पापप्रणाशनं॥ प्रायश्चित्तं परं तीर्थस्नानं महर्षिभिः स्मृतं। किन्तु तीर्थं त्वजेन्द्रो मनसापि हि किञ्चि
यां॥ उग्रा गत्वा न च स्नात्वा स्वर्गयास्यसि निश्चितं। प्रयागस्नानमात्रेण नराणां नाकोन संशयः॥ अन्य
देशकृतं पापं तत्क्षणाद् देवभामिनी। प्रयागे विलयं याति पापं तीर्थकृतं विना॥ पूर्णाभीरे प्रणाशं के
गौतमस्य मुनेर्वधूं। दृष्ट्वा कामवशं प्राप्तः स्त्रीगतोऽप्रकामुकः॥ तेनैवोग्रेण पापेन तदैव जनितः
तं फलं। अङ्के भिक्षी गन्तुरिं डस्य नस्ता [illegible] अपरतस्तदा कुरूपं गर्हितं जातं सतिलज्जाकरं वपुः। त
स्मृतेः शापमासाद्य सहस्रभगाचिह्नितः॥ अधोमुखस्ततो भूत्वा देवराजो विनिर्गतः। विनिंद्य स्वकृतं
कर्म सोमिभूतलज्जया॥ मेरोः स्वर्गलितो याचोशतयोजनविस्तरे। तत्र गत्वा प्रतिष्ठस्तु हे मां मोतहके
दरं॥ तत्रस्थो गर्हयन्नित्यं स्वात्मानं मन्मथं तथा। धिक्तां कामात्मतां लोके सद्यः पातकदायिनी॥ यः
या हि नरकं यांति सर्वलोकविगर्हिताः। आयुः कीर्त्तिर्यशो धर्मधैर्यध्वंसकरं सदा॥ धिङ्मन्मथं दुः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रा॰म॰

॥२१॥

तं स्वग्नि वासे निशाचरः ॥ त्वं मे वृंते ध्रुवा नो मे चरणौ कामपीडिताः । मया ते वंचिताः सर्वे सर्वस्वेन तु माय
या ॥ अन्योन्यशोषभावेन मृताः केचित्तु कामिनः । इत्थं तु नगरे रम्ये स कालो मे गतस्तदा ॥ प्राप्ते तु वार्द्ध
के भावे गुणो बहुदयं मम मानदं तेन कृतेन तप्तं न व्रते च कृतं मया ॥ नाराधितो महादेवश्चतुर्वर्गफल
प्रदः । न मया पूजिता देवि दुर्गा दुर्गतिनाशिनी ॥ सर्वपापहरो विष्णुर्न स्मृतो भोगलुब्धया । न यसंतोः
षिता विप्रा न कृतं प्राणिनां हितं ॥ श्रवणे मात्रं मया [illegible] न कृतं तत्प्रमादतः । पातकं च कृतं भद्रं ते
न मे दग्धं ते मनः ॥ वृद्धत्वे विलप्याहं [illegible] शरणं गता । तस्मिन् वेदविदां संतस्य राज्ञः पुरोहि
तं ॥ स हि पृष्टो मया रथः कथं मे निष्कृतिर्भवेत् । पापस्यास्य द्विजश्रेष्ठ कथं यास्यामि सद्गतिं ॥
त्वं नैव कर्मणा तप्तां वराकीं दीनमानसां । पापपंके निमग्नाहं मामुद्धर करुणाग्रहैः ॥ मयि कारुण्यसंवा ॥२१॥
रि वर्षहर्षदृशा द्विजा । स्मः जने साधवः सर्वे साधुः साधुरलज्जाने ॥ इत्युक्तो मद्वचः श्रुत्वा वकारानु ॥रा॰म॰॥
ग्रहं मयि कृष्णवे प्रीतिकरं वाक्यं स्वधर्ममयं द्विजः ॥ निमिष्ठा चरणां जाने सर्वं ते चरणां गणो कृतमे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वत्तो स्वेच्छरी गतिः॥ केन पुण्येन ना वा भद्रे न वर्त्तो तो मे यं वपुः॥ अतीव रूपसंपन्नं संभृतं च मनोहरं। त्व
द्रस्त्रविंदुपानेन मम मूर्छितलोचनेः। क्षणेन हृदयंगम दांतिं कुरं मे मानलं सदा॥ नीलस्य महिमा को यमेत
द्वा वक्तुमर्हसि॥ त्वं मे शीवती मासि नाकृतिनिर्गुणा भवेत्॥ अप्सराउवाच॥ अयं नाम सरा चाहं भो
रक्षः कामरूपिणी॥ प्रयागत आगताहं नाम्ना कांचनमालिनी॥ आईः परिकरो मे ततः प्रस्थिताहं
सितासिते॥ गंतव्यं तु मया रक्षः कैलाशे पर्वतोत्तमे। यत्रास्ते पार्वतीनाथो सुरासुरनरार्चितः॥ वेः
णीवारि प्रभावेन रक्षस्ते क्रूरतां गता। याताहं येन पुण्येन गंधर्वस्य शुभे धसः॥ कन्यकादिव्यरूप
वनत्वं वै कथयामि ते। कलिंगाधिपते राज्ञो ह्यहमासं विलासिनी॥ रूपलावण्यसंपन्ना सौभाग्य
मदगर्विता। अन्यासां युवतीनां तु तत्पुरे हं शिरोमणिः॥ तज्जन्मनि मया रथ्योऽभ्यस्त्काभो गान्यथेच्छ
या। मोहितं तत्पुरं सर्वं रूपयौवनसंपदा॥ रत्नानि च विचित्राणि भूषणानि धनानि च। वासांः
सि चित्ररूपाणि कर्पूरागरुचंदनं॥ तत्तु पार्जितं सर्वं मया मोहनरूपया। नाहं जानामि हे मंत्रो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मरसंगणाः सर्वे पितृगणांव तथागणाः ॥ स्नातुमायांतितेसर्वे माघे वेणीं नराधिप ॥ कृते युगेस्वरूपे
ण कलौ ब्रह्म नेन्द्र विराः ॥ प्रयागे माघमासेतु त्र्यहं स्नानस्य तन्द्भवेत् ॥ नाश्वमेधसहस्रेण तत्फलं ल
भते भुवि ॥ त्र्यहं स्नानफलं माघे पुराकांचनमालिनी ॥ राक्षसाय ददौ न्यय तेन मुक्तः स पापकृत् ॥ का २२
तेर्वीर्य उवाच ॥ भगवन् राक्षसः कोसौ कासौ कांचनमालिनी ॥ कथं दत्तवती धर्मं कथं वा संगतिस्तयोः
एतत् कथय योगीन्द्र क्षत्रिसंतानभास्कर ॥ यदि त्वं मन्यसे प्रश्नं परं कौतूहलं हि मे ॥ दत्तात्रेय उवा
च ॥ शृणु राजन्नविच्छिन्नत्वं इतिहासं पुरातनं ॥ यस्य श्रवणमात्रेण वाजपेयफलं भवेत् ॥ अप्सरा रूप
संपन्ना नाम्ना कांचनमालिनी ॥ प्रयागे माघमासे सा स्नात्वा यान्ती हरालयं ॥ निकुंजे गिरिराजस्याति
ष्ठता घोररूपिणा ॥ दृष्ट्वा गगणमारूढा तेन दृष्टा नराक्षसा ॥ तेजस्विनी तु हे माभा पृष्टा तेन दीर्घलोच
ना ॥ चंद्राननाम्रु केशी च पीनोन्नतपयोधरा ॥ दृष्ट्वा च रूपसंपन्ना नाम्नु वाच स राक्षसः ॥ कात्वं कम ॥२६॥
लपत्राक्षि कुतः आगम्यतेत्वया ॥ साईद्र व वसनं कस्मात् त्वसाद्राते कवरीकृतः ॥ कुत्र वा गम्यते भीरोक ॥राम:॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ना

वयाघ्रनः॥ स्नात्तु माघ्यां निवेण्यां माघे मासि नराधिपः। सर्वतीर्थानि कृत्स्नानि पापिनां संगदोषतः॥ भः
वंति प्रस्नानि प्रयागे माघे मज्जनात्। प्राक्स्यजन्मभिः पापं संचितं यन्नरैर्नृप॥ तन्दवैन्दस्नसा
माभ्रेस्नातानां तु स्मितासिते। वाङ्मनःकायजं पापं नरस्य च हृदंभजेत॥ प्रयागे माघमासे तु यः
त्र्यहं स्नाति मानवः। पापं त्यक्त्वा दिवं याति जीर्णत्वचमिवोरगः॥ कृतं क्षेत्रसमा गंगा यत्र कुत्रा
वगाहिना। तस्माद्दशगुणा प्रोक्ता यत्र विंध्येन संगता॥ तस्माद्दशगुणा गंगा काश्यामुत्तरवाहि
नी। स्वराजन्दर्शनाद्देव ब्रह्महत्यापहारिणी॥ पश्चिमाभिमुखी गंगा कालिंद्या सह संगता। हंति
कल्पकृतं पापं मासमासेन मवदत्रधा॥ अद्भुतं कथयन्ते राजन्सा वेणी प्रविकीर्त्तिता। तस्यां माघेषु
ऊत्तैस्तु देवानामपि दुर्लभं॥ ब्रह्मविष्णुमहेशदेवो रुद्रादित्यमरुद्गणां गंधर्वा लोकपालाश्च य ध २
क्षयक्षकिंनरा॥ अणिमादिगुणाः सिद्धाः वैवान्ये तत्वदर्शिनः। ब्रह्माणी पार्वती लक्ष्मी शची मेन
दितिर्दितिः॥ सर्वास्ता देवपत्न्यश्च तथा नागांगनाः पा घृताची मेनकारंभाउर्वशी च तिलोत्तमा॥ सु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तांस्तु सत्त्वं तु श्रुत्वा नं कपिलात्तथा॥ नेनदत्तां हि गंगायां यो माघे स्नाति मानवः। पापघ्न रिभारस्य
सहदेवं प्रजापतिं॥ प्रयागं विद्धि भो भूय प्रजानां वहितेरतः। सुस्नात्वात्र मिदं सम्यक्तिलातिल
जलं किल॥ पापरूपपशूनां च ब्रह्मणो विहितं पुरा। सितासिता नु या धारा सरस्वत्या विगर्भिते
तं मार्गं ब्रह्मलोकस्य सृष्टिकर्त्ता सस्लजं हि। सितासिते तु यो मज्जेदपि पापशतावृतं॥ मकरस्थे र
वौ माघे नसमैं गो ब्रमज्जति। दुर्जरा वै भवी माया या यादेवैरपि दुस्त्यजा॥ प्रयागे दसिते मानु माघेमे
सिनराधिपाते जो मये ब्रलोके प्रभुक्त्वा भोगाननेकशः॥ पश्चाच्चक्रिणोलीयं ते प्रयागे माघम
ज्जनात्॥ ३ वर्षशतियो माघे मकरार्के सितासिते॥ तस्य पुण्यस्य संख्या नो चित्रगुप्तोपि वेत्त्य.
लं। संवत्सरशतं सायं निराहारस्य यत्फलं॥ प्रयागे माघमासे तु अहस्नानस्य तत्फलं॥ स्वर्णभा
रसहस्रेण कृतं क्षेत्रे रविग्रहे॥ यत्फलं लभते माघे वेण्यां स्नानाद्दिने दिने॥ राजसूयसहस्रस्याः
राजन्नविकलं फलं॥ सितासिते तु वै माघे स्नातानां भवति ध्रुवं। पृथिव्यां यानि तीर्थानि प्रयसंत्रे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मात्रं दद्याद्द्विजे देवि देत तथा॥ तत्तज्जगत्त्रयं राजन् लभते इह न सर्वदा॥ परस्यान्निं न सेवेत त्यजेद्द्विजः प्रति
ग्रहं॥ माघे तु भोजयेद्विप्रान् यथाशक्ति नराधिप॥ देयाच्च दक्षिणां तेभ्यः श्रद्धया मनुजः श्रेयमिच्छता॥ एकादशी
विधानेन माघस्योद्यापनादिकं॥ कर्तव्यं प्रयत्नेन अक्षयस्वर्गवांछया॥ मकरस्थे रवौ माघे गोवि
न्दाच्युत केशव॥ स्नानेनानेन मे देव यथोक्तफलदो भव॥ इमं मंत्रं समुच्चार्य स्नायान्मौनी समा
हितः॥ वासुदेवं हरिं कृष्णं माधवं च स्मरेत् पुनः॥ तप्तेन वारिणा स्नानं यद्गृहे क्रियते नरैः॥ ष
डब्दफलं तत् हि मकरस्थे दिवाकरे॥ बहिःस्नानं तु वाप्यादौ द्वादशाब्दफलं स्मृतं॥ तडागे द्वि
गुणं राजन् नद्यां चैव चतुर्गुणं॥ सहस्रगुणितं सर्वं तत्फलं मकरे रवौ॥ गंगायां स्नानमात्रेण लभ
ते मानवो नृप॥ गंगां ये चावगाहंति माघे मासि तपोधनाः॥ चतुर्युगसहस्रांते नयतं ति सुराः
लयम्॥ मातेन गुणितं माघे सहस्रं राजसत्तम॥ निर्दिष्टं माघमि स्नानं गंगायमुनसंगमे
दिने दिने सहस्रं तु सुवर्णानां विशांपते॥ तेन दत्तं हि गंगायां यो माघे स्नाति मानवः॥ अनु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्माद्धेतो राजन्गंगायां तत्संगात्तेविप्राःश्रेष्ठ महापातकनाशिनी॥ विप्रौ तावगृह्णीतां गेहे सत्वस्थाव मलः
वादिनः। स्नाजन्मसंचितं पापं नाशयंति क्षणेन वै॥ इति ते संचितं पुण्यं शुश्रूषमेघ स्वजनानि स्वपात्रैः
देहि तत्पुण्यं नरकाद्येन मुच्यते॥ इति दूतवचः श्रुत्वा ददौ पुण्यं स सत्वरं। दूतः ह्येनं चेतसा प्राणानि
यान्तौ विनिर्गतानाः॥ देवैस्तौ पुष्पवर्षेण पूजितौ तौ दिवंगतौ। ताभ्यां संपूजितः सम्यग्गाहदूतो यथाग
तं॥ अखिलजंनसुबोधं देवदूतस्य वाक्यं निगमवचनरूपं वैश्यपुत्रो निशम्य॥ स्वकृतसुकृतदाना
न्नाततं तारयित्वा सुरपतिवरलोकं तेन सार्द्धं जगाम॥ इतिहासमिमं राजन् यः पठेच्छृणुयादपि स
गोसहस्रदानस्य विपापो लभते फलं॥ १४॥ इति श्रीपद्मपुराणे उत्तरखंडे वशिष्ठदिलीपसंवादे माघ
माहात्म्ये वैश्यपुत्राख्यानं नाम द्वितीयः॥ २०॥ कार्त्तवीर्य उवाच॥ हे मुने नाके न विप्रर्षे माघस्नानेन मम श्रुतः
प्रभावो वर्णितेन त्वं तन्मां कथय सुव्रतः॥ गतपापो यदेकेन द्वितीयेन दिवं गतः॥ वैश्यो माघजपुण्ये
न कुहि मेतत्कौतूहलं दत्तात्रेय उवाच॥ निसर्गात्सलिलं मेध्यं निर्मलं शुचि पांडुरं। मलहं पुरुषव्यो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·म·
||२४||

पुत्रवकं दाहकं तथा॥ धारणं सर्वभूतानां पोषकं जीवकं तथा। आपो नारायणो देवः सर्ववेदेषु पठ्यते॥
ग्रहाणां च यथा सूर्यो नक्षत्राणां यथा शशी। मासानां हि यथा माघः श्रेष्ठः सर्वेषु कर्मसु॥ मकरस्थे रवौ मा-
घे प्रातःकाले तथामले। गोपदेषु जले स्नानं स्वर्गदं पापिनामपि॥ यो गोयंडु हत्त्वा मोराजन्त्रैलोक्यस च-
राचरे। तस्मिन्योगे त्वशक्तोपि स्नामाघ यदि दिनत्रयं॥ दद्यात्किंचिद्यथाशक्ति मारिद्र्याभावमिद्धता।
ति: स्नानेनापि माघेस्तु इन्दिनो दीर्घजीविनः॥ यं च वासपन्वाराजन्यं च वदर्धते फलं। संप्राप्ते मकरादि-
त्ये पुण्ये पुण्ये प्रदेसान॥ स कार्यातिथयः सर्वाः स्नानदानादिकाः क्रियाः। कर्त्तारं प्रसजंती हि स्वधूनेन श्रा-
थ्यतं फलं॥ तस्मान्माघे नरः स्नायात्मनो हितवांछया। कर्त्तव्यो नियमः कश्चिद्व्रतरूपी नरोत्तमैः॥ फ-
लानि स्नाय हेतोर्वै किंचिद्भोज्यं परित्यजेत्। भूमौ शायी तहोलव्यमाज्यं तिलविमिश्रितं॥ त्रिकालं वार्चयं ||२४||
नित्यं वासुदेवं सनातनं। दातव्योऽखंडितो दीपो देवमुद्दिश्य माधवं॥ इंधनं कंबलं वस्त्रं उपानत्कुंकुमं ||रामः||
घृतं। तैलं कार्पासकौशेयं चतूलीं तूलवतीं वटीं॥ अन्नं चैव यथाशक्त्या देयं माघे नराधिपः। स्वर्णं च रक्तिकं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यः ॥ कथं लोमशश्च वाक्येन विद्याकान्त्या शापस्त्वं भवात् ॥ विमुक्ताः कुत्र तास्सृष्टः माघं ताः कतिसंख्यया
॥ वसिष्ठ उवाच ॥ शृणु यतो राजशार्दूल धर्मगर्भां परां कथां । यथा रोरवहितार्थी धर्मसर्वहितः सूरिः
वः ॥ गंधर्वः स्वरसंगीतिस्तस्य कन्या प्रमोदिनी । सुशीलास्यच शीला सस्वरा स्वरवेदिनः ॥ सु
तारा चंद्रकांतस्यच प्रभा सुप्रभस्य वा । इमानि वरनामानि तासामप्सरसां नृप ॥ क्रमाद्वर्षैः पंचस
वर्षा वयसा समताः सुताः ॥ शोभंते यथा भगिन्यो मिथस्ता स्वसखीवृत्ताः ॥ चंद्रादिव विनिष्क्रांता श्वं
डिकेव समुज्ज्वलाः ॥ चंद्राननाः सुकेशिन्यश्च चंडामृतरसाधराः ॥ नेत्रैषानंदकारिण्यः कौमुदीके
रवेष्विवालावण्यपिंडसंभृता वररूपा मनोहराः ॥ उद्भिन्नकुचपाणिन्यः यक्षिण्याइवमाधवोऊ
नीलयौवनैः कांताः वस्त्रैर्नवनवपत्रैः ॥ हेमगौराः सुहेमाभाः हेमालंकारभूषिताः ॥ हेमचंप
कमालिन्यो हेमछविसुवाससः ॥ स्वरग्रामावली तालसुविविधामूर्छनासुवास्थानदानविनोद
सुवेणुवीणापणवादने ॥ मृदंगनादसंभिन्नलास्यमार्गलये सुच ॥ चित्रादिसुविनोदेषु कलासुच

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi
विशारदः॥ एवंभूतास्सुताः कन्यास्समुद्रः क्रिडंते वने। पितृभिर्लालिताः सत्यः श्वेतरुप्य धनदालये। कौतु॒ः
कादेकदा पंच मिलित्वा मासि माधवे। कन्या मंदारपुष्पाणि विचिन्वंत्यो वनाद्वनं। गौरीं समाराधयितुं
वरांगनाः कदाचिदंभोदसरोत्तु नंययो। हेमांबुजानि प्रवराणि ताः पुनस्तस्मादुपादाय वरोत्पलैः सह
॥ विद्रूर्यप्रबद्धस्फटिकप्रकूटिमैः स्नात्वा तडागे परिधाय चांवरं। मौनेन स्थंडिलपिंड कामयीं स्वर्णस्य
सिक्ताभिरुमां विनिर्ममुः॥ समर्चितां चंदनकर्पूरकुंकुमैरभ्यर्च्य गौरीं वरपंकजादिभिः। नानोपहारैस्सुसम
क्तिभाविता लास्यप्रयोगैर्ननृतुः कुमारिकाः॥ गांधारमाश्रित्य वरं स्वरं ततो गेयं सुतारध्वनिभिः सुमूर्छ्छः
नं। एणीदृशस्ताः प्रजगुः कलाक्षरं वारुप्रवंधं गतिभिश्च सुस्वरं॥ तस्मिन्सुनादे रसवर्षहर्षदे कन्यास्वकैः
लैर्निर्भरचित्तवृत्तिषु। एकोदतीर्थप्रवरे तदागतः स्नातुं मुने वेदनिधेः सुतोग्रिपः॥ रूपेण निःसीमतरो
वराननः पाथोजपत्रायतलोचनो युवा। विस्तीर्णवक्षाः सुभुजोतिसुंदरः श्यामच्छविः काम इवापरो हि
सः॥ सद्ब्रह्मचारी भ्रशिखो विराजते दंडेन युक्तो धनुषेव मन्मथः। एणाजिनप्रावरणः सुसूत्रबंधकृहेम ॥३३॥
भमौंजीकटिसूत्रमेखलः॥ तं दृष्ट्वा जातलग्नवालाः नास्तत्र सरशीतटे। जहृषुः कौतुकाः विप्राः कोयं नान ॥रामः॥
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

यनातिपिः॥ तेजसा सूर्यसंकाशो रूपेण प्रतिमो भुवि। देवराजश्च किं स्वर्गान्समतायं धरातले॥ संत्यक्ता गी
तेन त्यास्तास्तस्या लोकनलालसा। हरिणीलुब्धकेनेव विक्षाः कामेन सायकैः॥ पश्यपश्यपतिं जल्पंतो मुग्धा
ःपंचसत्वं भ्रमं तस्मिन्विप्रवरे युनि कामदेवभ्रमं ययुः॥ पुनःपुनस्तमभ्यर्चनयनैः पंकजैरिव। पश्चात्तर्क्क
णमारब्धमप्सरोभिः परस्परं॥ यद्ययं कामदेवो हि रतिहीन कथं चरेत्। अथवायमश्विनौ देवौ तौ नित्यं युग्म
चारिणौ॥ गंधर्वः किन्नरो वायं धात्रा सृष्टो हि नः कृते। यथा भाग्यवतामर्थो निधानं पूर्वकर्मभिः॥ अद्यास्माकं
कुमारीणां मोयानीतो वरोत्तमः। करुणाजलकल्लोलप्लवाईकृतचित्तया॥ मयावृतस्त्वया वायं त्वयावृतस्त
थामया। एवं पंचसुकन्यासु वदंतीषु नृपोत्तमः॥ श्रुत्वा तद्वचनं तत्र कृतमाध्याह्निकक्रिया। आलोक्य हृदये
सोपि विप्रमेतदुपस्थितं॥ ब्रह्मविष्णुगिरिशादयः सुरा ये च सिद्धमुनयः पुरातनाः। तेपि योगबलिनो विमो
हिताः लीलया तदबलाभिरद्भुतं॥ योषितां नयनतीक्ष्णसायकैः र्फुलतामुद्दृष्ट्वापवदेवजनतामयं भ
वेत्। तावदेव दृढचित्तता भृशं तावदेव गणना कुलस्य च। तावदेव तपसः प्रगल्भता तावदेव भगप्रसेवनं नृ
णां॥ यावदेव वनितेक्षणास्त्रैर्मीयते द्रुतमदेन पूरुषः। मोहयंत्यमदयंत्युरागिणां योषितः स्वललितैर्मनै

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi
हरैः॥ मोहयंति मदयंति मामिमा धर्मरक्षणपरैहितैकगोः॥ मांसमूत्रमलरक्तनिर्मिते योषितां वपुषि तिर्य-
गोभुचौ॥ कामिनस्तु परिकल्पचारुतामारमं तु मुखविमूढचेतसः॥ दारुणो हि परिकीर्त्तितोऽङ्गनासंनिधि-
र्विमलवुद्धिभिर्नरैः॥ यावदन्नन समीपगा इमास्तावदेव हि गृहं व्रजाम्यहं॥ वालिप्रउवाच॥ समीपं तस्य
यावन्नेता गच्छंति वरस्त्रियः॥ वैक्लवेन प्रभावेन तावदंतर्दधे द्विजः॥ तस्य योगवलाद्रूपगतस्यादर्शणांत
ना दृष्ट्वा तदद्भुतं कर्म ऋषिपुत्रमहात्मनः॥ वित्रस्तनयना वाला कुरंग्य इव कातराः॥ संभ्रांतहृदया भग्ना द-
दंभग्ना दिशो दशः॥ इंद्रजालं स्फुटं चेति मायां जानंति वा पुनः॥ दृष्टोप्यदृष्टरूपो भूदित्युक्त्वा ताः परस्परं॥
व्याप्तं वहृदयं तासां तदैव विरहाग्निना॥ ज्वलद्दावानलेनेव वर्छन्ति ग्धं साइकाननं॥ ताऊचुः॥ त्यक्तेंडजाः
लिकिं विद्यां कां तदर्शयसत्वरं॥ स्वात्मानं नर्मणा त्वं कं प्राग्रासे मपिकोपमं॥ हा कष्टं दर्शितः कस्माद्धात्रा त्वं
घटितः कुतः॥ ज्ञातं महासंतापहेतोर्नस्त्वं विनिर्मितः॥ कच्चित्ते निर्दयं चेतः कच्चिदस्मासु नो मतिः॥ कच्चि-
न्नृपत्ययोस्मासु कच्चिदस्मान्परीक्षसे॥ कच्चिन्नर्मकलाशीलः कच्चिन्मायाविशारदः॥ कच्चिच्चित्ते प्रवेष्टुं ॥३४॥
त्वं वेत्सि विज्ञानलाघवात्॥ कच्चिन्निष्क्रमणोपायं न जानासि कुतः पुनः॥ कच्चिद्विनापराधं तु त्वमस्मासु प्रकु- ॥राम॥
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पते॥ कश्चिद्दुःखं न जानासि परेषां विप्रलंभने॥ त्वद्दर्शनं विना नूनं हृदये ज्वरसांप्रति॥ न जीवामोऽथ जी
वामः पुनस्त्वद्दर्शनाशया॥ वयं च नीयतां तत्र शीघ्रं यत्रागतो भवान्॥ त्वद्दर्शनं हरं धाता व्यदधीदं क्रूरधि
दां सर्वथा दर्शनं देहि कारुण्यं भज सर्वथा॥ पर्यंते न प्रपश्यामः कस्याश्चित्तु जनाजनां॥ इत्थं विलपतां क
न्यां प्रतीक्ष्य न चक्रुः धराः॥ पितृभया कृहं गं तु शीघ्रमारेभिरे ततः॥ तन्त्रे मन्त्रिगृहे वज्रा भृशं विरहकात
राः॥ कथंचिद्धैर्यमालंब्य ताः स्वं स्वं गृहमागताः॥ श्रागत्य पतिताः सर्वा जलार्यं तत्र समीयतः॥ किमेतन्मातृभिः
२५ जैन्याउहे पृष्टाः कुतः कालात्ययो भवत्तीं क्रीडं त्यः॥ किं नारीभिस्तु सार्द्धं संगीतकं मुदा॥ संस्थिता तेन न ज्ञातो दिवसोऽ
वसरो वरे॥ पथि श्रांता वयं मातुः संतापस्ते न नस्त्वनौ॥ मो हे न महता वक्रं न केनाप्युत्सहामहे॥ स्वन
ड्वाचा॥ इत्युक्त्वा तु लुलुंठुस्तत्र मणिमन्मौकुमारिकाः॥ श्राकारं गोपयंत्यस्ताः मुग्धाक्षल्पति मातृभिः
काचिन्नर्त्तयते क्रीडामयूरं न मुदा तदा॥ स्वं पाठयति नो कीरं पंजरे व्याकुलत्कला तौ लालयेन्न कलं
नान्या नोदत्रापयाति सारिकां॥ सुपरानीचसं मुग्धा नैव खेलति सारसैः॥ भेजिरे गाविनोदं तारेभिरे
नैव मंदिरे॥ ऊचिरे बांधवैर्नालं वीणावाद्यन चक्रिरे। कस्याश्चन्मभ्यमन्तं यइस्संयतं तु धोपमं॥ मंदा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरैः॥ मोहयंति मदयंति मानिमा धर्मरक्षणपरा हि के गौः। मांसमूत्रमलरक्तनिर्मिते योषितां वपुषि तिग्
गोभूचौ॥ कामिनस्तु परिकल्पयात् तामार मंनुष्यविमूढचेतसः॥ दारुणो हि परिकीर्तितोऽङ्गनासंनिधि
र्विमलबुद्धिभिर्नरैः॥ यावदत्र न समीपगा इमास्तावदेव हि गृहं व्रजाम्यहं॥ वसिष्ठ उवाच॥ समीपं तस्य
यावन्नेता गच्छंति वरस्त्रियः॥ वेश्मवेन प्रभावेन तावदंतर्दधे द्विजः॥ तस्य योगबलात्प्राप्तं तस्यादर्शनांत
ता दृष्ट्वा तदद्भुतं कर्म ऋषिपुत्रमहात्मनः॥ वित्रस्तनयना बालाकुरंग्य इव कातराः॥ संभ्रांतहृदया भ्रान्त्या द
दृश्यन्त्यो दिशो दशः॥ इंद्रजालं स्फुटं चेति मायां जानंति वा पुनः॥ दृष्टोऽप्यदृष्टरूपोऽभूदित्युक्त्वा ताः परस्परं॥
व्याप्तवहृदयं तासां तद्देवविरहाग्निना॥ ज्वलद्दावानलेनेव वृष्टिध्वंसाइ काननं॥ तारुण्यः॥ त्यक्त्वेऽङ्गजाः
लिकिं वियोऽकांत दर्शय सत्वरं॥ त्वात्मानं नर्मणा युक्तं प्राणास्ते मषिकोपमं॥ हा कष्टं दर्शितः कस्माद्धात्रा त्वं
घटितः कृतः॥ ज्ञातं महासंतापहेतोर्नस्त्वं विनिर्मितः॥ कच्चित्ते निर्दयं चेतः कच्चिदस्मासु नो मतिः॥ कच्चि ॥३४॥
न्नृपतयोऽस्मासु कच्चिदस्मान्परीक्षसे॥ कच्चिन्नर्मकलाशीलः कच्चिन्मायाविशारदः॥ कच्चिच्चित्ते प्रवेष्टुं ॥राम॥
त्वं वेत्सि विज्ञानलाघवात्॥ कच्चिन्निष्क्रमणोपायं न जानासि कुतः पुनः॥ कच्चिद्विनापराधं तु त्वमस्मासु प्रकु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पते॥ कश्चिद्दुःखं न जानासि परेशां विप्रलंभनं॥ त्वद्दर्शनं विना नूनं हृदये स्थर सां प्रति॥ न जीवामो ऽथ जी
वामः पुनस्त्वद्दर्शनाशया॥ वयं त्वनीयतां तत्र शीघ्रं यत्रागतो भवान्॥ त्वद्दर्शनं हरं धाता व्यदधी द्दकुरच्छि
दां सर्वथा दर्शनं देहि कासरणं भजाम् सर्वथा॥ पर्यंते नष्ठ पश्यामः कस्यचित्तु जनाजनां इत्थं विलपताः क
न्याः प्रतीक्ष्य नवकुश्च राणां॥ पितृभया कृहं गं तु शीघ्र मारे भिरे ततः॥ तन्त्रे मन्त्रियाद्वैर्वद्धा भ्रशं विरहकात
राः॥ कथंचिद्धैर्यमालंब्य ताः स्वं स्वं गृहमागताः॥ आगत्य पतिताः सर्वा जलार्यत्र समीयतः॥ किमेतन्मातृभिः
२५ कैन्याडे पृष्टाः कृतः कालात्यया भवत्तां क्रीडंत्यः किं त्वरी भिस्तु सार्द्धं संगीतकं मुदा॥ संस्थिता तेन न ज्ञातो दिवसो ऽ
त्र सरोवरे। पथि श्रांता वयं मातुः संतापस्ते न न स्तनौ॥ मोहेन महता व कुं न केनाप्युत्सहामहे॥ स्नात
ऽवाचा॥ इत्युत्साजुलुकुस्तत्र मणि भूमौ कुमारिकाः॥ आकारं गोपयंत्यस्ताः मुग्धा अस्वपतिमातृभिः
काचिन्नर्त्तयते क्रीडामयूरं न च दात तदा॥ त्वं पाठयति नो कीरं पंजरे व्याकुलं तु हृत्वा तां लालयेन्न कुलैः
नान्पानोद्दत्रापयाति सारिकां॥ अपरा तीव्रसं मुग्धा नैव खेलति सारसैः॥ भेजिरे ता विनोदं तारे भिरे ऽ
नैव मंदिरे॥ ऊचिरे वांधवैर्नालं वीणावाद्यं न चक्रिरे। कल्पद्रुमस्य भक्तं तं यद्दसंयन्त्र तु धोपमं॥ मंदा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰ मा॰

॥२५॥ कुसुमामोदं नवपुष्पमधुरं मधु । योगिन्याद्भवन्ताः कन्यानानास्त्र न्यस्तलोचनम् ॥ अलक्ष्य ध्यानसंध्यानाः
प्रत्येकन्तममानमाः । चंद्रकांतमणिक्षेत्रवक्षावारिकराड्कैः ॥ धाराणां वातायनेस्थिता जलयंत्रेषु गोक्षरौ
रत्नयंतिक्षणं शय्यां दीर्घां कांमोजिनीदलैः ॥ वीज्यमानाः सखीभिस्ताः शीतलैः कदलीदलैः । इत्थं तु गास
मारान्नीमानयंस्त्वावरस्त्रियः ॥ कंठविद्रीरत्नां कृत्वा विज्वराः सज्वराः इव । प्रातर्वो मम प्राणं दृष्ट्वा मन्यामान्
ःस्वजीवितं ॥ विज्ञाप्यमातरं स्वां स्वां गौरिपूजाविधिं गताः । स्नात्वानेन विधानेन गंधधूपैस्तथा ॥ विः
धाय पूजनं देव्या गायंत्यस्तत्र ताः स्थिताः ॥ एतस्मिन्नंतरे विप्रः स्नातुं सोपि समागतः ॥ पित्रा श्रमपदात्ते
स्मादत्रैदेत्र सरोवरे ॥ मित्रं दृष्ट्वैव राज्यां ते पश्चिन्या इव कन्यकाः ॥ उत्कृष्टनयनाजातास्तं दृष्ट्वा बलैः →
चारिणं गत्वा तद्दैवताः कन्याः समीपं तु ब्रह्मचारिणः ॥ सर्वा पसव्यावंधेन भुजपाशं चकाशिरे । गतोः
सिध्यत्त्वप्रवेश्य गं तु मध्यनलभासे ॥ वत त्वं नमस्कामि त्रीत्र कार्यविचारणा । इत्युतो बालकाः प्राह ॥२५॥
प्रहसन्वाक्पाशगाः ॥ विप्र उवाच ॥ युष्माभिरुच्यते मध्य मन्त कुलप्रियं वचः । प्रथमाश्रमनिष्ठस्य किंतु ॥राम॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाप्नापि मे श्रुतं ॥ वेदाभ्यासन शीलस्य पारं याति गुरोः कुले ॥ आश्रमे यत्र यो धर्मो रक्षणीयः सपंडितैः ॥
विवाहो यमतो मन्ये न धर्म इति कन्यका ॥ वसिष्ठ उवाच ॥ आकर्ण्य तत्स्य वाक्यानि तमूचुः स्नातवत्सत्त
वः ॥ मुकरध्वनिसोत्कंठकोकिलाइवमाधवे ॥ नाकुत्र ॥ धर्मादर्थोऽर्थतः कामः कामो धर्मफलोदय
ः ॥ इत्येवं नि[illegible]यं शास्त्रे वर्णयंति विपश्चितः ॥ स कामो धर्मवाकुल्यानुरक्ते समुपस्थितः ॥ सेव्यतां वि
विधैर्भोगैः स्वर्गप्राप्तिरियं यतः ॥ श्रुत्वा तद्वचनं तासां प्राह गंभीरया गिरा ॥ ब्रह्मचर्य्युवाच ॥ कथं वो
वचनं किंतु समाप्यैवं व्रतं स्वकं ॥ प्राप्यानुज्ञां गुरोः कुर्वे विवाहं कर्मणान्यथा ॥ इत्युक्तोऽपि नरश्रेष्ठस्ताः
स्तु [illegible] सितसुंदर । दिव्यौषधं तु [illegible] यरसायनं सिद्धिर्निधिः साधुकलाव[illegible]णाः । मंत्रस्तथा
सिद्धरसं स्वधर्मतो नेनिषेव्याः सुधियास्समागताः ॥ कार्ये हि देवाद्यादिसिद्धिमागतं तस्मिन्नुपेक्षां न
च याति नीतिगाः ॥ यस्मादुपेक्षा नयनः फलप्रदा तस्मान्न दीर्घीकरणं प्रसस्यते ॥ स्वांगानुरागाः कु
लजाति निर्मलाः स्नेहार्द्रचित्ताः सुगिरः स्वयंवराः ॥ कन्याः सुरूपाः खलु चारुयौवनाः धन्याल भंते

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा॰ स्त॰
॥३६॥

CC-0. Digitized by eGangotri and MIDF- Delhi

चनरास्तु ने तरे॥ कव संख्रसंदर्यः कभवान्स्ताय मोवद॥ दुर्घ तस्या विधाने हि मन्ये धाता ऽतिपंडि
तः॥ तस्मादस्मान्निदानीं तु स्त्रीकुर्यान्मंगलं भवान्॥ गांधर्वेण विवाहेन अन्यथा नो न जीवितं॥ अतः
नाकारस्ततः प्राह स्वामी लोलौ धर्मचिंतमः॥ भो मृगाक्षाः कथं साज्यो धर्मो धर्मपरैर्नरैः॥ धर्मश्चार्थश्च
कामश्च मोक्षश्चैव चतुष्टयं॥ यथोक्तं सफलं ज्ञेयं विपरीतं तु निष्फलं॥ नाकाले हं व्रती कुर्यां ततो दार
पतिग्रहं॥ निष्क्रियाफलमाप्नोति क्रियाकालं न वेत्ति यः॥ यतो धर्मविचारेऽस्मिन्नुत्सुकं मम मानसं॥
तस्मात्कृणुत हे कन्या न लक्ष्मी हस्वयंवरं॥ एवं ज्ञात्वा स्वयं तस्य समीक्ष्यैव परस्परं॥ करात्करं विमुच्य
थ जगाहांभ्रीपुमोहिनी भजौ ज गहस्तं तस्य सुशीला च स्वरा तथा॥ आलिलिंग सुतारा च वक्त्रं चुचुंबः
चंद्रिकाः॥ तथापि निर्विकारो सौ पुलयानलसन्निभः॥ शशाप बलवान्रिक्ताः क्रोधेनात्यंतमूर्छितः॥ पि
शाच्य इव मां लग्नाः तत्पिशाच्यो भविष्यथ॥ एवं ते नाग्रसैः प्राप्ताः संत्यज्य पुरतः स्थिताः॥ किमेतत्स्वेषि
तं पापस्य नागमिज्ञ नेत्वया॥ प्रियं कृत्यप्रियं कृत्वा धिकृतां धर्मज्ञातांतवा॥ अनुरक्तेषु भक्तेषु मित्रेषु
द्रोहकारिणः॥ पुंसो लोकद्वये सौख्यं नास्त्येमेतीति न श्रुतं॥ तस्मात्त्वमपि नः शापात्पिशाचो भव सत्वरं॥

॥३६॥
॥रामः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्युक्ता विरता बालानिःश्वसंत्यः क्रुधाकुलाः। तदा बान्योन्य[illegible]मन्तस्मिन्सरसि पार्थिव ॥ ताः कन्या ब्रह्म
चारी सर्वे पैशाच्यमागताः। पिशाच्यः स पिशाचश्च क्रंदमानाः सुदारुणं ॥ स्वेच्छया इव दुर्वारं देवानामपि
पार्थिवः। क्रंदंति पितरस्तासां मातरस्तस्य तत्र च ॥ अप्रमादश्च बालानां दैवो हि दुरतिक्रमः। ततः क्रुद्धं
पिशाच्यास्ते आहारार्थे सुदुःखिताः॥ इतस्ततश्च धावंतो वसंति सरस्तटे। एवं बहुतिथे काले लोमशो मु
निसत्तमः॥ पौषमासि चतुर्दश्यामकोदे स्नातुमागतः। तं दृष्ट्वा ब्राह्मणाः सर्वे भ्रांत्या पाशसमाकुलाः॥ धावं
तो पन्नका मास्ते मिलित्वा रथवर्त्तिनः। दह्यमानाः सुतीक्ष्णेन तेजसा लोमशस्य च ॥ असमर्थाः पुरस्थातुं स
वे तिष्ठरतः स्थिताः। तदा वेदनिधिर्विप्रस्तत्रैव हि समागतः॥ शमीक्ष्य लोमशं राजन्सांष्टांगं प्रणिपत्य सः
उवाच प्रणतो वाचं बद्ध्वा शिरसि चांजलिं ॥ महाभाग्योदये विप्र साधूनां संगतिर्भवेत्। गंगादि सर्वतीर्थेषु
नरः स्नाति सर्वदा ॥ यः करोति सतां संगं तयोः सत्संगति वराः। गुरूणां संगमो विप्र दृष्टादृष्टफलो भवि॥ स्व
र्दो रोगहारी च गंगेव सत्समागमः। इत्युक्तो कथयामास पूर्ववृत्तांतमद्भुतं ॥ इमा गंधर्वकन्यास्ताः मुने से

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यंममात्मजः ॥ सर्वेपि श्रावरूपेण मिथःशापविमोहिताः ॥ दीनाननास्तु तिष्ठंति तत्राग्रे मुनिसत्तम ॥ त्वद्दर्श
नेनबालानांनिस्तारो भविष्यति ॥ सूर्योदयेतमस्तोमः किंन्नलीयेतभास्करं ॥ श्रुत्वैतत्तन्मश्रेष्ठो राजन्कृपार्द्रः
कृतमानसः ॥ उवाचमहातेजास्तंमुनिंपुत्रदुःखितं ॥ मत्प्रसादाच्चबालानांस्मृतिःसंप्रतिजायतां ॥ ध
र्मंचावबोधितंयेनमिथःशापोलयंव्रजेत् ॥ वेदनिधिरुवाच ॥ महर्षेकथ्यतांधर्मोप्रचीर्नयेनबालका
ः ॥ नायंकालोविलंबस्यशापाग्निर्दीप्यतेयतः ॥ लोमश उवाच ॥ मयालब्धंप्रकुर्वंतुमाघस्नानंविधान
तः ॥ शापान्मोक्ष्यंतिमाघांतेनान्यथानिष्कृतिर्भवेत् ॥ शापःशापफलोविप्रपापनाशोध्रुवंनृणां ॥ माघ
स्नानेनसत्तीर्थेइतिनोनिश्चितामतिः ॥ सप्तजन्मकृतंपापंवर्तमानंचपातकं ॥ माघस्नानंदहेत्सर्वंपु
ण्यतीर्थेविशेषतः ॥ प्रायश्चित्तंनपश्यंतियस्मिन्पापेमनीषिणः ॥ पातकंपुण्यतीर्थेषुनश्येत्तदपिमाः ॥२७॥
घतः ॥ ज्ञानकर्मानलेमाघस्नानमोक्षफलःस्मृतः ॥ हिमवन्सर्वतीर्थेषुसर्वपापप्रणाशनः ॥ इंद्रलोक ॥राम:॥
प्रदोऽस्त्वादेनिर्दिष्टोवेदवादिभिः ॥ सर्वकामप्रदोमाघोमोक्षदोवदरीवने ॥ पापहादुःखहारीचसर्वकाम

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

फलप्रदः ॥ रुद्रलोकप्रदो माघो नार्मदः पापनाशनः । यामुनः सूर्यलोकाय भवेत्कल्मषघातकः ॥ सारस्व
तोग्निविध्वंसी वरुणलोकफलप्रदः ॥ विशालफलदो माघो विशालायां द्विजोत्तम ॥ पापेंधनस्य दावाग्निर्ग
र्भहेतुक्रियापहः । विष्णुलोकाय मोक्षाय जाह्नवः परिकीर्तितः ॥ सरयूः गंडकी सिंधुश्चंद्रभागा च कौशिकी ।
तापी गोदावरी भीमा पयोष्णी कृष्णवेणिका ॥ कावेरी तुंगभद्रा च यमुनाद्याश्च समुद्रगाः ॥ आसु माघी नरो याति
स्वर्गलोकं विकल्मषः ॥ नैमिषे विष्णुसारूप्यं पुष्करे ब्रह्मणोंतिकं । मार्कंडलस्य लोकोहि कुरुक्षेत्रे तु माघ
तः ॥ माघो देवह्रदे विप्र योगसिद्धिफलप्रदः । प्रभासे मकरादित्यस्नानाद्रुद्रगणो भवेत् ॥ देविकायां देव
देहो नरो भवति माघतः ॥ माघस्नानेन भो विप्र गोमत्यां न पुनर्भवः ॥ हेमकूटे महाकाले ॐकारे मकरे त
था । नीलकंठे वृदे माघाद् इंद्रलोके महीयते ॥ सर्वासां सरितां विप्र संभेदे मकरे रवौ । स्नानेन सर्वकामाना
मवाप्तिर्जायते नृणां ॥ माघस्तु प्राप्यते धन्यैः प्रयागे मुनिसत्तम । अपुनर्भवदं तत्र सितासितजले यतः ॥
गायंति देवाः सततं दिवि स्थिताः माघप्रयागे किल नो भविष्यति । स्नाता नरा यत्र न गर्भवेदनां पश्यंति ति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰म॰

॥३८॥ पुंतिचविष्णुसंन्निधौ॥मज्जंतियेपित्र्पहमत्रमानवास्तीर्थेप्रयागेवकुपापकंचुका:॥मज्जंतितेनोनिर
येषुधर्मविनिस्वर्गेषुपेवारुवरंतिदेववत्॥तीर्थेव्रतिदानतपोभिरध्वरै:सार्द्धंविधात्रातुलयाधृत:पुरा॰
माघप्रयागस्यतयोर्द्वयोरभून्माघोगरीयानतएवसोधिक:॥वातांतुपर्णाश्चनदेहशोषणैस्तपोभिरु
ग्रैश्चिरकालसंचितै:॥योगैश्चसंयांतिनरानतांगतिंस्नानात्प्रयागस्यहियांतियांगतिं॥स्नातानरोमाक
करभास्करोदयेतीर्थेप्रयागेसुरसिंधुसंगमे॥तेषांगृहद्वारमलंकरोतिकिंभृंगावहगीतकुंजरकाणि
ताडिता॥योराजसूयाद्धयमेधयज्ञत:स्नानात्फलंसंप्रददातिचाधिकं॥पापाणिसर्वाणिविलोपयन्ती:
लयानूनंप्रयाग:सकथंतुवर्ण्यते॥एवंतीविषयेराजावीरसेनोऽभवत्पुरा॥नर्मदातीरमासाद्यराजसूयं
चकारस:॥षोडशैरेवमेधैश्चस्वर्णवेश्मविराजितै:॥स्वर्णभूषणयूपाद्यैरेजेसोपियथाविधि॥प्रददौ ॥३८॥
धान्यराशींश्चद्विजेभ्यःपर्वतोपमान्॥वदान्योदेवताभक्तोगोप्रद:सुवर्णद:॥ब्राह्मणोभद्रकोनामभृत् ॥राम:॥
र्द्धहीनकुलस्तथा॥कृषीवलोदुराचार:सर्वधर्मबहिष्कृत:॥सीरकर्मसमुद्विग्नोबंधुभिश्चसमुज्झित:॥ह

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मात्तः परिभ्रम्य निर्गतोऽवन्तिपीडितः ॥ दैवतः सौर्थमाविश्य प्रयागं स समागतः ॥ मकरस्थं माघं पुरस्कृत्य तस्य
सौ तत्र दिनत्रयं ॥ स्नानघः स्नानमात्रेण मृत्वैव स द्विजो नाम ॥ प्रयागाञ्जलितस्तत्र पुनर्यस्मात्समागतः ॥
स राजा सोपि विष्णुश्च विपन्नौ कदा तदा तयोर्गतिः समा दृष्टा मयाश्चर्यरूपस्य सन्निधो ॥ तेजोरूपं बलं स्वर्णौ दे
वयानं विमानं मंदारमंजरीमाला च तयोर्गतं समं तयोः ॥ इति दृष्ट्वा हि माहात्म्यं क्षेत्रस्य कथमुच्यते ॥ माघ
ः सितासिते विप्र राजसूयैः समा मया ॥ धन्वन्तरिः श्रुति विस्तीर्णः सितनीलांबुसंगमे ॥ माघाद पुनराहन्तिराज
सूयैः पुनः पतेत् ॥ माघमासीप वा तोपि सितासिते जलं स्पृष्ट्वा न स्नुधं न्यान स्पृष्ट्वान्न नमहापातकहारिस
